

कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र. M740 विषय स्तोत्र
नाव. दुर्गासप्तशती (सचित्र)
लेखक/लिपीकार
पृष्ठ 184 काळ पूर्ण/अपूर्ण


॥ ॥अथब्रह्मकवचसमत्रातीप्रारंभः॥ ॥



॥श्रीमहागणपतयेनमः॥ ॥श्रीसरस्वत्यैन
मः॥ श्रीगुरुभ्योनमः॥ श्रीभगवत्यैनमः॥॥
॥अथब्रह्मकवचप्रारंभः॥ ॥ॐअस्यश्रीब्रह्म
कवचस्यब्रह्माऋषि॥अनुष्टुप्छंदः॥देवीदे
वता॥रक्षणेविनियोगः॥ ॥शतानीकउवाच



॥ ॥यद्गुह्यंपरमंलोकेसर्वरक्षाकरंनृणां॥॥
यन्नकस्यचिदाख्यातंतन्मेब्रूहिपितामह॥
॥१॥ब्रह्मोवाच॥ ॥ ॥अस्तिगुह्यतमंविप्र
सर्वभूतोपकारकम्॥देव्यास्तुकवचंपुण्यं
तच्छृणुष्वमहामुने॥२॥ ॥श्री॥


स.ब्र.
२

प्रथमंशै
लपुत्री
तिद्विती
यंब्रह्म
चारिणी

२

तृतीयं
चंद्रघंटे
तिकूष्मा
डेतिच
तुर्थकं ३

स·ब्र·
७



पंचमंस्कं
दमातेति
षष्ठंका
त्यायनी
तिच



७



सप्तम
कालरा
त्रीचम
हागौरी
तिचाष्टमं



म.ब्र.

१



माहेश्व
रीवृषा
रूढाकौ
मारीशि
वाहना ९



१



ब्राह्मी
हंसस
मारूढा
सर्वाभ
रणभूषिता



म॰ त्र॰

५



॥ धनवमं सिद्धिदा प्रोक्ता
नवदुर्गाः प्रकीर्त्तिताः ॥
उक्तान्येतानि नामानि ब्र
ह्मणैव महात्मना ॥ ५ ॥
अग्निना दह्यमानस्तु ।

५

शत्रुमध्ये गतो रणे ॥ विषमे दुर्गमे चैव भयार्त्ताः
शरणं गताः ॥ ६ ॥ न तेषां जायते किंचिदशुभं रण
संकटे ॥ नापदं तस्य पश्यामि शोकदुःखभयं न हि
॥ ७ ॥ यैस्तु भक्त्या स्मृता नूनं तेषां सिद्धि प्रजायते
॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥

म.ब्र.
६



॥ प्रेतसं ॥
स्थातुचा ।
मुंडावा ।
॥ राहीम ।
॥ हिषासन



६



॥ ऐंद्री ।
गजसमा
रूढावैष्ण
वीगरु
डासना ।





माहेश्व
रीवृषा
रूढाकौ
मारीशि
वाह्ना ५





ब्राह्मी
हंसस
मारूढा
सर्वाभ
रणभूषिता



॥म॰त्र॰
॥८॥

लक्ष्मीः पद्मासना दे
वी पद्महस्ता हरिप्रि
या॥२०॥ श्वेतवस्त्रध-
रा देवी ईश्वरी वृषवा
हना॥२१॥ इत्येता मातर-



॥८॥

र सर्वाः सर्वयोगसमन्विताः॥२२॥ नानाभर-
णशोभाढ्या नानारत्नोपशोभिताः॥ ॥श्रेष्ठै-
श्च मुक्तिकैः सर्वा दिव्यहारप्रलंबिभिः॥२३
॥इंद्रनीलैर्महानीलैः पद्मरागसुशोभनैः॥
॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

म. ब्र.
॥ ९ ॥

दृश्यंते॥
रथमा॥
रूढा दे॥
व्यः क्रोध॥
ममाकु॥



॥ ९ ॥

ला॥२३॥ शंखं चक्रं गदां शक्तिं हलं च मुशलायुधं॥
॥खेटकं तोमरं चैव परशुं पाशमेव च ॥२४॥ कुं
तायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमं॥ चर्म खड्गं
त्रिशूलं च पट्टिशं मुद्गरं तथा॥२५॥ दैत्यानां देह
नाशाय भक्तानामभयाय च॥ धारयंत्यायुधानि

स·ब्र·
॥१०॥

त्वंदेवानांचहितायवै ॥ १६ ॥ नमस्तेस्तुमहारौद्रे
महाघोरपराक्रमे ॥ महाबलेमहोत्साहेमहाभ-
यविनाशिनी ॥ १७ ॥ त्राहिमांदेविदुःप्रेक्ष्येशत्रूणां
भयवर्द्धिनि ॥ प्राच्यांरक्षतुमाऐंद्री आग्नेय्यामग्नि
देवता ॥ १८ ॥ दक्षिणेरक्षवाराहीनैरृत्यांखड्गधारि

॥१०॥

णी ॥ प्रतीच्यांवारुणीरक्षेद्वायव्यांमृगवाहिनी
॥ १९ ॥ उदीच्यांरक्षकौबेरीईशान्यांशूलधारिणी ॥
ऊर्ध्वंब्रह्माणिमेरक्षेदधस्ताद्वैष्णवीतथा ॥ २० ॥ ए
वंदशदिशोरक्षेच्चामुंडाशववाहना ॥ जयामेचाग्र
तःपातुविजयापातुपृष्ठतः ॥ २१ ॥ अजितावामपा

र्श्वेतुदक्षिणेचापराजिता॥ शिखांमेद्योतिनी रक्षेदु
मामूर्ध्निव्यवस्थिता॥२२॥ मालाधरीललाटेचभ्रुवौर
क्षेद्यशस्विनी॥ त्रिनेत्राचभ्रुवोर्मध्येयमघंटाचना
सिके॥२३॥ शंखिनीचक्षुषोर्मध्येश्रोत्रयोर्द्वारवासि
नी॥ कपोलौकालिकारक्षेत् कर्णमूलेतुशांकरी॥२४॥

नासिकायांसुगंधाचउत्तरोष्ठेचचर्चिका॥ अधरेचा
मृतकलाजिह्वायांचसरस्वती॥२५॥ दंतान्रक्षतुकौ
मारीकंठमध्येतुचंडिका॥ घंटिकांचित्रघंटाचमहा
मायाचतालुके॥२६॥ कामाख्याचिबुकंरक्षेद्वाचंमेस
र्वमंगला॥ ग्रीवायांभद्रकालीचपृष्ठवंशेधनुर्द्धरी॥२७

म॰ ब्र॰
१२

नीलग्रीवाबहिंकंठेनलिकांनलकूबरी। खड्गधारि
ण्युभौस्कंधौबाहूमेवज्रधारिणी। २० । हस्तयोर्दंडिनी
रक्षेदंबिकाचांगुलीषुच। नखान्शूलेश्वरी रक्षेत्कु
क्षौरक्षेत्तलेश्वरी। २१ । स्तनौरक्षेन्महादेवीमनःशोक
विनाशिनी। हृदयेललितादेवीउदरेशूलधारिणी। २२

नाभौचकामीनी रक्षेद्गुह्यंगुह्येश्वरीतथा। पूतनानाथा
तुमेढ्रंचगुदेमहिषवाहिनी। २३ । कट्यांभगवतीर
क्षेज्जानुनीविंध्यवासिनी। जंघेमहाबलाप्रोक्ताजानु
मध्येविनायकी। २४ । गुल्फयोर्नारसिंहीचपादपृष्ठेत
चैतैजसी। पादांगुलीश्रीधरीचपादाधस्तलवासिनी

॥२३॥ दंष्ट्राकरालिनी रक्षेत्केशांश्चैवोर्ध्वकेशिनी ॥ रो-
मकूपाणि कौबेरी त्वचं वागीश्वरी तथा ॥२४॥ रक्तम-
ज्जावसामांसान्यस्थिमेदांसि पार्वती ॥ अंत्राणि काल-
रात्री च पित्तं च मुकुटेश्वरी ॥२५॥ पद्मावती पद्मको-
शे कफे चूडामणी तथा ॥ ज्वालामुखी नखाज्वालमभे-

द्या सर्वसंधिषु ॥२६॥ शुक्रं ब्रह्माणि मे रक्षेच्छायां छ-
त्रेश्वरी तथा ॥ अहंकारं मनो बुद्धिं रक्षमे धर्मचारिणी
॥२७॥ प्राणापानौ तथा व्यानमुदानं च समानकं ॥ वज्र-
हस्ता च मे रक्षेत्प्राणं कल्याणशोभनी ॥२८॥ रसं रूपं
च गंधं च शब्दं स्पर्शं च योगिनी ॥ सत्वं रजस्तमश्चैव रक्षे-

सं·ब्र·
१४

न्नारायणीसदा ॥ ३९ ॥ आयुर्मेरक्षवाराहि धर्मंर
क्षतुवैष्णवी ॥ यशःकीर्त्तिंचलक्ष्मींचसदारक्षंतुमान
रः ॥ ४० ॥ गोत्रमिंद्राणिमेरक्षेत्पशून्मेरक्षचंडिके ॥
पुत्रान्रक्षेन्महालक्ष्मीर्भार्यांरक्षतुभैरवी ॥ ४१ ॥ धने
श्वरीधनंरक्षेत्कौमारीकन्यकांतथा ॥ पंथानंसुपथा

१४

रक्षेन्मार्गंक्षेमंकरीतथा ॥ ४२ ॥ राजद्वारेमहालक्ष्मी
र्विजयासर्वतस्थिता ॥ सर्वरक्षाकरंपुण्यंकवचंसर्व
दाजपेत् ॥ ४३ ॥ इदंरहस्यंविप्रर्षेभक्त्यातवमयोदितं
रक्षाहीनंतुयत्स्थानंवर्जितंकवचेनतु ॥ ४४ ॥ तत्स
र्वंरक्षमेदेवीजयंतीपापनाशिनी ॥ रक्षमेसर्वगात्राणि

दुर्गेदुर्गापहारिणी ॥४५॥ पदमेकंनगछेतयदिछे
छुभमात्मनः कवचेनावृतोनित्यंयत्रयत्रैवगछति
॥४६॥ तत्रतत्रार्थलाभश्चविजयःसर्वकामिकः ॥ यंयं
चिंतयतेकामंतंतंप्राप्नोतिनिर्मलं ॥४७॥ परमैश्वर्य
मतुलंप्राप्नोतिविपुलंपुमान् ॥ निर्भयोजायतेमर्त्य

संग्रामेषपराजितः ॥४८॥ त्रैलोक्येतुभवेत्पूज्यःक
वचेनावृतःपुमान् ॥ इदंतुदेव्याःकवचंदेवानामपि
दुर्लभं ॥४९॥ यइदंकवचंकृत्वासंग्रामेप्रविशेन्नरः
जित्वाचमरिपून्सर्वान्कल्याणीगृहमाप्नुयात् ॥५०॥
यःपठेत्प्रयतोनित्यंत्रिसंध्यंश्रद्धयान्वितः ॥ दैवीकला

नवेत्तस्यत्रैलोक्येचापराजितः॥५१॥जीवेद्वर्षशतं
चाग्रमपमृत्युविवर्जितः॥नश्यंतिव्याधयःसर्वेलूता
विस्फोटकादयः॥५२॥स्थावरंजंगमंवापीकृत्रिमंचापि
यद्विषं॥शांतिचाराणिसर्वाणिमंत्रयंत्राणिभूतले॥५३
भूःचराखेचराश्चैवकुलजाश्चोपदेशिकाः॥सहजाः

कुलजामालाडाकिनीशाकिनीतथा॥५४॥अंतरी
क्षचराघोराडाकिन्यश्चमहाबलाः॥ग्रहभूतपिशा
चाश्चयक्षगंधर्वराक्षसा॥५५॥ब्रह्मराक्षसवेताला
:कूष्मांडाभैरवादयः॥नश्यंतिदर्शनात्तस्यकवचेहृ
दिसंस्थिते॥५६॥मानोन्नतिर्भवेत्तस्यतेजोवृद्धिकरंप

रं ॥ यत्रासावर्दते सोपि कीर्त्तिमंडितन्नृतले ॥५७॥ त
स्माज्जपेत्सदा नित्याकवचं कामदं मुने ॥ जपेत्समस्त
तीचंडीकृत्वातुकवचंपुरा ॥५८॥ निर्विघ्नेनभवेत्सि
द्धिश्चंडीजपसमुद्भवा ॥ यावद्भूमंडलंधत्ते सशैल
वनकाननं ॥५९॥ तावत्तिष्ठति मेदिन्यां संततिःपुत्र

पौत्रकी ॥ देहांते परमंस्थानं यत्सुरैरपिदुर्लभं
॥६०॥ प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥
मनसाचिंतितंकार्यंतत्सर्वंसफलंभवेत् ॥६१॥



॥ ॥ इतिहरिहरब्रह्माविरचितंदेव्याकवचं ॥१॥ ॥
॥श्री॥ ॥ ॥ ॐअस्यश्रीअर्गलायाःश्रीभगवानृ
षिः॥अनुष्टुप्छंदः॥श्रीदुर्गादेवता॥ॐऐंह्रींक्लीं
चामुंडायेविच्चेनमःशक्तिः॥मंत्रोदेवता॥देव्यःऐं
ह्रींक्लींबीजं॥ममसप्तशतीमनुस्तत्वे॥अर्गलाजपेवि

स॰श॰ निंयोगः॥ श्री॥ ॥जयंती मंगलाकाली भद्रकाली कपालिनी। दुर्गाक्षमाशिवाधात्रीस्वाहास्वधानमोस्तुते॥१॥मधुकैटभविद्रावविधात्रिवरदेनमः॥ रूपंदेहिजयंदेहियशोदेहिद्विषोजहि॥२॥महिषासुरनिर्नाशिविधात्रिवरदेनमः॥ रूपंदेहिजयंदेहिय

१९

१९

स॰श॰ ॥ शोदेहिद्विषोजहि॥३॥ अचिंत्यरूपचरितेसर्वशत्रुविनाशिनि॥ रूपंदेहिजयंदेहियशोदेहिद्विषोजहि॥४॥ नतेभ्यःसर्वदाभक्त्याचंडिकेदुरितापहे॥ रूपंदेहिजयंदेहियशोदेहिद्विषोजहि॥५॥ स्तुवद्भ्योभक्तिपूर्वंत्वांचंडिकेव्याधिना

॥२०॥

॥२०॥

शोदेहिद्विषोजहि ॥ ३ ॥ रक्तबीजवधेदेविचंडमुंड
विनाशिनि ॥ रूपंदेहिजयंदेहियशोदेहिद्विषोज
हि ॥ ४ ॥ शुंभस्यैवनिशुंभस्यधूम्राक्षस्यचमर्द्दिनी ॥
रूपंदेहिजयंदेहियशोदेहीद्विषोजहि ॥ ५ ॥ वंदितां
घ्रियुगेदेविदैविसौभाग्यदायिनी ॥ रूपंदेहिजयंदे

शिनि ॥ रूपंदेहिजयंदेहियशोदेहिद्विषोजहि ॥
९ ॥ चंडिकेसततंचेतामर्च्चयंतीह्नक्तितः ॥ रू
पंदेहिजयंदेहियशोदेहिद्विषोजहि ॥ १० ॥ देहि
सौभाग्यमारोग्यंदेहिदेविपरंसुखं ॥ रूपंदेहि
जयंदेहियशोदेहिद्विषोजहि ॥ ११ ॥ विधेहिद्विष

मस०
२१

तांनाशंविधेहिबलमुच्चकैः॥ रूपंदेहिजयंदेहि
यशोदेहिद्विषोजहि॥ २२॥ विधेहिदेविकल्याणं
विधेहिविपुलांश्रियं॥ रूपंदेहिजयंदेहियशोदे
हिद्विषोजहि॥ २३॥ सुरासुरशिरोरत्ननिघृष्टचर
णेंबिके॥ रूपंदेहि०॥ २४॥ विद्यावंतंयशस्वंतंल

२१

क्ष्मीवंतंजनंकुरु॥ रूपंजयं०॥ २५॥ प्रचंडदैत्यद
र्पघ्नेचंडिकेप्रणतायमे॥ रूपंदेहि०॥ २६॥ चतु
र्भुजेचतुर्वक्त्रसंस्तुतेपरमेश्वरी॥ रूपंदेहि०॥
२७॥ कृष्णेनसंस्तुतेदेविशश्वद्भक्त्यात्वमंबिके॥ रू
पंदेहि०॥ २८॥ हिताचलसुतानाथसंस्तुतेपरमे

स० २२

श्वरी ॥ रूपं देहि० ॥१९॥ इंद्राणीपतिसद्भावपू
जिते परमेश्वरि ॥ रूपं देहि० ॥२०॥ देवि प्रचंड
दोर्दंड दैत्यदर्पविनाशिनि ॥ रूपं देहि० ॥२१॥ देवि
भक्तजनोद्दामदत्तानंदोदयेंबिके ॥ रूपं देहि० ॥
२२ ॥ पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीं ॥

२२

तारिणीं दुर्गसंसारसागरस्य कुलोद्भवां ॥२३॥ इ
दं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ॥ स तु स
प्तशतीसंख्यावरमाप्नोति संपदः ॥२४॥ ॥ ॥
॥ ॥ इत्यर्गलास्तुतिसमाप्तः ॥ श्री ॥ ॥

मम०
२३



२३

॥ अस्यश्रीकीलकस्तुतेश्रीवर्मरूपाया: सर्वेश्व
रऋषि: ॥ चंडीदेवता ॥ अनुष्टुप्छंद: ॥ ॐऐंक्रींज्रीं
चामुंडायेविच्चेनम: शक्ति: ॥ मंत्रोदेवता ॥ देव्या: र
ऐंक्रींज्रींबीजं ॥ मालामनुस्तत्वं ॥ किलकंजपेवि
नियोग: ॥ ॐह्रांह्रींह्रौंऐंह्रंमलवर्ह्रींउमलव

सप्त.
२४

ह्रीं ऊं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः उत्कीलय उत्कीलय स्वा
हा: ॥ ॥ विशुद्धज्ञानदेहाय त्रिवेदीदि
व्यचक्षुषे ॥ श्रेयः प्राप्ति निमित्ताय नमः सोमार्द्धधा
रिणे ॥ २ ॥ सर्वमेतद्विनायस्तु मंत्राणामपिकीलनं
सोपिक्षेममवाप्नोति सततंजाप्यतत्परः ॥ २ ॥ सि

२४

ध्यंत्युच्चाटनादीनि वस्तूनि सकलान्यपि ॥ एतेन
स्तुवतांदेवीस्तोत्र मंत्रेन सिध्यति ॥ ३ ॥ न मंत्रो नौ
षधं तत्र न किंचिदपि विद्यते ॥ विनाजाप्येन सिध्ये
त सर्वमुच्चाटनादिकं ॥ ४ ॥ समग्राण्यपि सिध्यं
ति लोकशंकामिमांहरः ॥ कृत्वा नियंत्रयामास

स.स.
२५

सर्वमेवमिदंस्तुतं ॥५॥ स्तोत्रंवैचंडिकायास्तुतच्च
गुह्यंचकारस ॥ समाप्नोतिसुपुण्येनतांयथावन्नि
यंत्रिणां ॥६॥ सोपिक्षेममवाप्नोतिसर्वमेवनसंशयः॥
यः ॥ कृष्णायांवाचतुर्दश्यामष्टम्यांवासमाहितः ॥
॥७॥ ददातिप्रतिगृह्णातिनान्यथैषाप्रसीदति ॥

२५

॥ इत्थंरूपेणकीलेनमहादेवेनकीलितं ॥८॥ यो
निःकीलांविधायैनांनित्यंजपतिसस्फुटं ॥ ससिद्धः
सगणःसोपिगंधर्वोजायतेवने ॥९॥ नचैवाप्यट
तस्तस्यभयंक्वापिहिजायते ॥ नाल्पमृत्युवशंया
तिमृतोमोक्षमवाप्नुयात् ॥१०॥ ज्ञात्वाप्रारभ्यकुर्वीत

सप्त॰
२६

ह्यकुर्वाणो विनश्यति ॥ ततो ज्ञात्वैव संपन्नमिदं शा
स्त्यते बुधैः ॥ ११ ॥ सौभाग्यादि च यत्किंचिद्दृश्यते लल
नाम्नैः ॥ तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभं ॥
१२ ॥ ज्ञाने न तु जप्यमानेस्मिन्स्तोत्रे संपत्तिरुच्चकैः ॥ न
वत्येव समभ्यापितनः प्रास्त्यमेव तत् ॥ १३ ॥ ऐश्वर्यं यत्



सादेन सौभा
ग्यारोग्यसंप
दः शत्रुहानि
परो मोक्षस्तु
यते मा न किं

स·त्र·
॥२१॥

जनैः॥२४॥ इतिनगवत्यार्उत्कीलनंसमाप्तः॥ ॥
॥ श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

॥ अथनवार्णमंत्रविधि॥ ॥ आचमनंप्राणायामः॥ अस्यश्रीनवार्णमंत्रस्यब्रह्मविष्णुरुद्राऋषयः॥ गायत्र्युष्णिगनुष्टुप्छंदांसि॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वत्योदेवता॥ ऐंबीजं ह्रींशक्तिः॥ क्लींकीलकं॥ श्रीमहाकालीमहाल॰

श्री मह्ासरस्वती प्रीत्यर्थे जपे विनियोगः॥ ब्र
ह्मविष्णुरुद्रऋषिभ्यो नमः शिरसि ॥ गायत्र्युष्णि
गनुष्टुप्छंदोभ्यो नमः मुखे ॥ महाकाली महाल
क्ष्मी महासरस्वती देवताभ्यो नमः हृदि ॥ ऐं बीजा
य नमः गुह्ये ॥ ह्रीं शक्तये नमः पादयोः ॥ क्लीं कीलका

२८

य नमः नाभौ ॥ ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे इति मू
लेन करौ संशोध्य ॥ अथ करन्यासः ॥ ॐ ऐं अं
गुष्ठाभ्यां नमः ॥ ॐ ह्रीं तर्जनीभ्यां नमः ॥ ॐ क्लीं मध्य
माभ्यां नमः ॥ चामुंडायै अनामिकाभ्यां नमः ॥ विच्चे
कनिष्ठिकाभ्यां नमः ॥ ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे क

रतलकरपृष्ठाभ्यांनमः॥ इतिकरन्यासः॥ हृद
याद्रिऐंहृदयायनमः॥ ह्रींशिरसेस्वाहा॥ क्लींशिर
खायैवषट्॥ चामुंडायैकवचायहुं॥ विच्चेनेत्रत्र
यायवौषट्॥ ऐंह्रींक्लींचामुंडायैविच्चेअस्त्रायफ
ट्॥ ततोवर्णन्यासः॥॥ ॐऐंनमःशिखायां॥ ॐह्रींन

मःदक्षिणनेत्रे॥ ॐक्लींनमःवामनेत्रे॥ ॐचांनमः
दक्षिणकर्णे॥ ॐमुनमःवामकर्णे॥ ॐडांनमःदक्षि
णनासायां॥ ॐयैनमःवामनासायां॥ ॐविंनमःमुखे
ॐच्चेनमःगुह्ये॥ एवंविन्यस्यअष्टवारंमूलेनव्यापं
केकुर्यात्॥ ॐऐंप्राच्यैनमः॥ ॐऐंआग्नेय्यैनमः॥ ॐह्रीं

दक्षिणायैनमः॥ॐह्रींनैऋत्यैनमः॥ॐह्रींप्रतीच्यै
नमः॥ॐह्रींवायव्यैनमः॥ॐचामुंडायैउदीच्यैनमः
ॐचामुंडायैईशान्यैनमः॥ॐऐंह्रींक्लींचामुंडायैवि
च्चेऊर्ध्वायैनमः॥ॐऐंह्रींक्लींचामुंडायैविच्चेभूम्यैन
मः॥अथध्यानंकाली॥खड्गंचक्रगदेषुचापपरि ३०


॥घान्शूलंभुशुं
॥डीशिरः॥शं
॥खंसंदधतींक
॥रैस्त्रिनयनांस
॥र्वां [illegible]षावृता

॥ नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालि
कां ॥ यामस्तौत्स्वपिते हरौ कमलजो हंतुं मधुं कैट
भं ॥ १ ॥ अक्षस्रक्परशुं गदेषुकुलिशं पद्मं धनुः
कुंडिकां ॥ दंडं शक्तिमसिं च चर्म जलजं घंटां सुराभा
जनं ॥ शूलं पाशसुदर्शने च दधतीं हस्तैः प्रसन्नान

नां सेवे सैरिभ ॥
मर्दिनीमिह म ।
हालक्ष्मीं सरो ॥
जस्थितां ॥ २ ॥ इति
महालक्ष्मीध्यान ॥



सस०
३२



॥अथसरस्वतीध्या
॥घंटाशूलहलानिशं
॥खमुसलेचक्रंध
॥नुःसायकंहस्ताब्जै
॥र्दधतीघनांतविल

सछितांशुतुल्यप्रभां॥ गौरीदेहसमुद्भवांत्रि
नयनामाधारभूतांमहापूर्वामत्रसरस्वतीमनु
नजेशुंभादिदैत्यार्दिनीं॥ ॥इतिमहासरस्वतीध्या
नंअष्टोत्तरशतसंख्ययामंत्रराजंसंजप्य जपंनि
वेद्य॥ समस्तशांतीपठेत॥ ॥इतिनर्वाणमंत्रविधिः

अथसप्तशतीन्यासः प्रथममध्यमोत्तरचरित्राणां
ब्रह्मविष्णुरुद्राऋषयः॥ महाकालीमहालक्ष्मी
महासरस्वत्योदेवताः॥ गायत्र्युष्णिगनुष्टुपछंदां
सि॥ नंदाशाकंभरीभीमाःशक्तयः॥ रक्तदंतिका
दुर्गाभ्रामरीबीजानि॥ अग्निवायुःसूर्यस्तत्वानि

ऋग्यजुःसामवेदाध्यानानिसकलकामनासिद्ध
येश्रीमहाकालीमहालक्ष्मीमहासरस्वतीप्रीत्य
र्थेजपेविनियोगः॥ तत्रादौन्यासः॥ खड्गिनीशू
लिनीघोरा० अंगुष्ठाभ्यांनमः॥ शूलेनपाहिनोदे
वि० तर्जनीभ्यांनमः॥ प्राच्यांरक्षप्रतीच्यांच० म

दु·सा·
२४

ध्यमाभ्यां नमः ॥ सौम्यानि यानि रूपाणि॰ अनामि
काभ्यां नमः ॥ खड्गशूलगदादीनि॰ कनिष्ठिकाभ्यां
नमः ॥ सर्वस्वरूपे सर्वेशे॰ करतलकरपृष्ठाभ्यां न
मः ॥ इति करन्यासः ॥ खड्गिनी शूलिनी घोरा॰ हृ
दयाय नमः ॥ शूलेन पाहि नो देवि॰ शिरसे स्वाहा ॥ ३४

प्राच्यां रक्ष प्रतीच्यां च॰ शिखायै वषट् ॥ सौम्या
नि यानि रूपाणि॰ कवचाय हुं ॥ खड्गशूलगदा
दीनि॰ नेत्रत्रयाय वौषट् ॥ सर्वस्वरूपे सर्वेशे॰
अस्त्राय फट् ॥ इति न्यासः ॥ अथ दुर्गाध्यानं
॥ श्री ॥ ॥ विद्युद्दामसमप्रभां मृगपतिस्कं

धिष्ठितांनी॥
षणांकन्या॥
भिःकरवा॥
लखेटवि॥
लसद्धस्ता॥



भिरासेवितां॥ हस्तैश्चक्रधरालिखेटविशिखां
चापंगुणंतर्जनीं। बिभ्राणामनलात्मिकांशशिध
रांदुर्गांत्रिनेत्रांभजे॥१॥ इतिदुर्गाध्यानं॥ ॥श्री
कृष्णद्वैपायनाभिधानमहर्षिवेदव्यासप्रोक्त।
सात्विकसावर्णिकमन्वंतरीयसावर्णिः सूर्यतन

गीता
२६

॥ इत्यादिसावर्णिर्भविता मनुरिति तद्वंयमंद-
र्भेत्तगवतीमाहात्म्यप्रकाशकस्य सद्भूत्याग्रम-
हं कुर्वे ॥ श्रीगुरुपरमगुरुत्योनमः ॥ ॥ प्रथमच-
रितस्यब्रह्माऋषिः ॥ महाकालीदेवता ॥ गायत्रीछं-
दः ॥ नंदाशक्तिः ॥ रक्तदंतिकाबीजं ॥ अग्निस्तत्वं ॥ श्री

२६



॥ महाकालीप्रीत्यर्थे
॥ प्रथमचरित्रजपे
॥ विनियोगः ॥ ॥ मा-
र्कंडेय उवाच ॥ ॥
॥ सावर्णिः सूर्यतन-

योयोमनुःकथ्यतेऽष्टमः॥निशामयतदुत्पत्तिं
विस्तराद्गदतोमम॥२॥महामायानुभावेनयथाम
न्वंतराधिपः॥सबभूवमहाभागःसावर्णिस्तनयो
रवेः॥३॥स्वारोचिषेंतरेपूर्वंचैत्रवंश समुद्भवः॥
सुरथोनामराजाभूत्समस्तेक्षितिमंडले॥४॥तस्य

पालयतःसम्यक्प्रजाःपुत्रानिवौरसान्॥बभूवुः
शत्रवोभूपाःकोलाविध्वंसिनस्तदा॥५॥तस्यतैरभ
वद्युद्धमतिप्रबलदंडिनः॥न्यूनैरपिसतैर्युद्धेको
लाविध्वंसिभिर्जितः॥६॥ततःस्वपुरमायातोनिज
देशाधिपोऽभवत्॥आक्रांतसमहाभागस्तैस्तदा॥



सबलारिभिः ॥७॥ श्व
मात्यैर्बलिभिर्दुष्टैर्दु
र्बलस्यदुरात्मभिः ॥
कोशोबलंचापहृतं
तत्रापिस्वपुरेततः ॥८॥ ततोमृगयाव्याजेनहृतःस्वा

म्यःसभूपतिः ॥ एकाकीहयमारुह्यजगामगहनंव



नं ॥९॥
सतत्राश्र
ममद्राक्षी
द्विजवर्यस्य
मेधसः ॥

प्रशांतश्वापदाकीर्णंमुनिशिष्योपशोभितं॥१०॥
तत्स्थौ किंचित्सकालंचमुनिनातेनसत्कृतः॥
इतश्चेतश्चविचरंतस्मिन्मुनिवराश्रमे॥११॥सो
चिंतयत्तदातत्रममत्वाकृष्टचेतनः॥मत्पूर्वैःपा
लितंपूर्वंमयाहीनंपुरंहितत्॥१२॥मद्भृत्यैस्तै

रसद्वृत्तैर्धर्मतःपाल्यतेनवा॥नजानेसप्रधानो
मेशूरहस्तिसदामदः॥१३॥ममवैरिवशंयातःका
न्भोगानुपलप्स्यते॥येममानुगतानित्यंप्रसादधः
नभोजनैः॥१४॥अनुवृत्तिंध्रुवंतेद्यकुर्वंत्यन्यमहीभृ
तां॥असम्यग्व्ययशीलैस्तैःकुर्वद्भिःसततंव्ययं॥१५॥

सप्त.
४७



४८

॥संचितःसोतिदुःखेनक्षयंकोशोगमिष्यति॥॥
॥एतच्चान्यच्चसततंचिंतयामासपार्थिवः॥२६॥तं
चविप्राश्रमान्यासेवैरूपमेकंददर्शसः॥सदृष्ट्
स्तेनकस्त्वंनोहेतुस्त्वागमनेचकः॥२७॥सशोकर
वकस्मात्त्वंदुर्मनाइवलक्ष्यसे॥इत्याकर्ण्यवचस्त

स॰श॰
४१

स्यन्नृपतेंप्रणयोदितं ॥१८॥ प्रत्युवाचसतंवैश्यःप्र
श्रयावनतोनृपं ॥१९॥ वैश्यउवाच ॥ ॥२०॥ समा
धिर्नामवैश्योऽहमुत्पन्नोधनिनांकुले ॥२१॥ पुत्रदारै
र्निरस्तश्चधनलोभादसाधुभिः ॥ विहीनश्चधनैर्दारैः
पुत्रैरादायमेधनं ॥२२॥ वनमभ्यागतोदुःखीनिरस्त

४१

श्चाप्तबंधुभिः ॥ सोऽहंनवेद्मिपुत्राणांकुशलाकुश
लात्मिकां ॥२३॥ प्रवृत्तिंस्वजनानांचदाराणांचात्रसंस्थि
तः ॥ किंनुतेषांगृहेक्षेममक्षेमंकिंनुसांप्रतं ॥२४॥
ते॰ कथंकिंनुसद्वृत्तादुर्वृत्ताःकिंनुमेसुताः ॥२५॥ राजो
वाच ॥ २६ यैर्निरस्तोभवाँल्लुब्धैःपुत्रदारादिभिर्धनैः

स॰श॰ ॥ २७ ॥ तेषुकिंभवतःस्नेहमनुबध्नातिमानसं ॥ २८
४२ ॥ वैश्यउवाच ॥ ॥ २९ ॥ एवमेतद्यथाप्राहभवा
नस्म
द्गतंवचः ॥ ३० ॥ किंकरोमिनबध्नातिममनिष्ठु
रतांमनः ॥ यैःसंत्यज्यपितृस्नेहंधनलुब्धैर्निराकृ
तः ॥ ३१ ॥ पतिःस्वजनहार्दंचहार्दितेष्वेवमेमनः ॥ कि

४२

मेतन्नाभिजानामिजानन्नपिमहामते ॥ ३२ ॥ यत्प्रे
मप्रवणंचित्तंविगुणेष्वपिबंधुषु ॥ तेषांकृतेमेनि
ःश्वासोदौर्मनस्यंचजायते ॥ ३३ ॥ करोमिकिंयन्नम
नस्तेष्वप्रीतिषुनिष्ठुरं ॥ ३४ ॥ मार्कंडेयउवाच ॥
३५ ॥ ततस्तौसहितौविप्रतंमुनिंसमुपस्थितौ ॥ ३६

मम·
४२

समाधिर्नामवैश्योसौसचपार्थिवसत्तमः ॥ कृ
त्वातुतौयथान्याय्यंयथार्हंतेनसंविदं ॥ ३१ ॥ उप
विष्टौकथाःकाश्चिच्चक्रतुर्वैश्यपार्थिवौ ॥ ३२ ॥
राजोवाच ॥ ॥ ३३ ॥ भगवंस्त्वामहंप्रष्टुमिच्छाम्ये
कंवदस्वतत् ॥ ३४ ॥ दुःखाययन्मेमनसःस्वचित्ता

४२

यत्ततांविना ॥ ममत्वंममराज्यस्यराज्यांगेष्वखिले
ष्वपि ॥ ३५ ॥ जानतोपियथाज्ञस्यकिमेतन्मुनिसत्तम
अयंचनिकृतःपुत्रैर्दारैर्भृत्यैस्तथोज्झितः ॥ ३६ ॥
स्वजनेनचसंत्यक्तस्तेषुहार्दीतथाप्यति ॥ एवमे
षःतथाहंचद्वावप्यत्यंतदुःखितौ ॥ ३७ ॥ दृष्टदो

स.म.
४४

षेपिविषयेममत्वाकृष्टमानसो ॥ तत्केनैतन्महा
भागयन्मोहोज्ञानिनोऽपि ॥ ४४ ॥ ममास्यचभवत्ये
षाविवेकांधस्यमूढता ॥ ४५ ॥ ऋषिरुवाच ॥ ॥
४६ ॥ ज्ञानमस्तिसमस्तस्यजंतोर्विषयगोचरे ॥ ४७ ॥
विषयश्चमहाभागयांतिचैवंपृथकपृथक ॥

४४

दिवांधाःप्राणिनःकेचिद्रात्रावंधास्तथापरे ॥ ४८
केचिद्दिवातथारात्रौप्राणिनस्तुल्यदृष्टयः ॥ ज्ञानि
नोमनुजाःसत्यंकिंतुतेनहिकेवलं ॥ ४९ ॥ यतो
हिज्ञानिनःसर्वेपशुपक्षिमृगादयः ॥ ज्ञानंचतन्
मनुष्याणांयत्तेषांमृगपक्षिणां ॥ ५० ॥ मनुष्याणां

चयत्तेषांतुल्यमन्यत्तथोभयोः ॥ ज्ञानेपिसतिप
श्यैतान्पतगान्छावचंचुषु ॥५१॥ कणमोक्षादृ
तान्मोहात्पीड्यमानानपिक्षुधा ॥ मानुषामनु
जव्याघ्रसाभिलाषाःसुतान्प्रति ॥५२॥ लोभात्प्रत्युप
कारायनन्वेतेकिंन्नपश्यसि ॥ तथापिममताव

र्त्तेमोहगर्त्तेनिपातिताः ॥५३॥ महामायाप्रभावेन
संसारस्थितिकारिणः ॥ तन्नात्रविस्मयःकार्यो
योगनिद्राजगत्पतेः ॥५४॥ महामायाहरेश्चैतत्त
यासंमोह्यतेजगत् ॥ ज्ञानिनामपिचेतांसिदेवी
भगवतीहिसा ॥५५॥ बलादाकृष्यमोहायमहामा

स०म०
४६

याप्रयछति॥तयाविसृज्यतेविश्वंजगदेतच्चरा
चरं॥५६॥सैषाप्रसन्नावरदानृणांभवतिमुक्तये
साविद्यापरमामुक्तेर्हेतुभूतासनातनी॥५७॥सं
सारबंधहेतुश्चसैवसर्वेश्वरेश्वरी॥५८॥राजो
वाच॥॥५९॥भगवन्काहिसादेवीमहामायेतियां

४६

भवान्॥६०॥ब्रवीतिकथमुत्पन्नासाकर्मास्याश्चकिं
द्विज॥यत्स्वभावाचसादेवीयत्स्वरूपायदुद्भवा॥६१॥
तत्सर्वंश्रोतुमिछामित्वत्तोब्रह्मविदांवरः॥६२॥
ऋषिरुवाच॥ ॥६३॥नित्यैवसाजगन्मूर्तिस्तया
सर्वमिदंततं॥६४॥तथापितत्समुत्पत्तिर्बहुधाश्रू
यतांमम॥देवानांकार्यसिध्यर्थमाविर्भवतिसाय

दा ॥६५॥ उत्पन्नेतितदालोकेसानित्याप्यभिधीयते
योगनिद्रांयदाविष्णुर्जगत्येकार्णवीकृते ॥६६॥ आ
स्तीर्यशेषमभजत्कल्पांतेभगवान्प्रभुः ॥ तदाद्वा
वसुरौघोरौविख्यातौमधुकैटभौ ॥६७॥ विष्णुकर्ण
मलोद्भूतौहंतुंब्रह्माणमुद्यतौ ॥ सनाभिकमले
विष्णोःस्थितोब्रह्माप्रजापतिः ॥६८॥ दृष्ट्वातावसु



स.स०
४८

रौचोग्रौप्रसुप्तंचजनार्द्दनं॥ तुष्टावयोगनिद्रांता
मेकाग्रहृदयस्थितः॥६९॥ विबोधनार्थायहरे
र्हरिनेत्रकृतालयां॥ विश्वेश्वरींजगद्धात्रींस्थिति
संहारकारिणीं॥७०॥ निद्रांभगवतींविष्णोरतुलां
तेजसःप्रभुः॥७१॥ ब्रह्मोवाच॥ ॥७२॥ त्वंस्वा

४८

हात्वंस्वधात्वंहिवषट्कारस्वरात्मिका॥७३॥ सु
धात्वमक्षरेनित्येत्रिधामात्रात्मिकास्थिता॥ अ
र्द्धमात्रास्थितानित्यायानुच्चार्याविशेषतः॥७४॥
त्वमेवसात्वंसावित्रीत्वंदेवीजननीपरा॥ त्वयै
तद्धार्यतेसर्वंत्वयैतत्सृज्यतेजगत्॥७५॥ त्वयैत

सप्त॰
४९

त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ॥ विसृष्टौ सृ
ष्टिरूपा त्वं स्थितिरूपा च पालने ॥ ७६ ॥ तथा संहृ
तिरूपान्ते जगतोस्य जगन्मये ॥ महाविद्या महा
माया महामेधा महास्मृतिः ॥ ७७ ॥ महामोहा च भ
वती महादेवी महासुरी ॥ प्रकृतिस्त्वं च सर्वस्य

४९

गुणत्रयविभाविनी ॥ कालरात्रिर्महारात्रिर्मोह
रात्रिश्च दारुणा ॥ त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बु
द्धिर्बोधलक्षणा ॥ ७८ ॥ लज्जा पुष्टिस्तथा तुष्टिस्त्वं
शान्तिः क्षान्तिरेव च ॥ खड्गिनी शूलिनी घोरा गदिनी
चक्रिणी तथा ॥ ८० ॥ शंखिनी चापिनी बाणभुशुं

डीपरिघायुधा ॥ सौम्यासौम्यतराशेषसौम्येभ्य
स्त्वतिसुंदरी ॥ ८१ ॥ परापराणांपरमात्वमेवपर
मेश्वरी ॥ यच्चकिंचित्क्वचिद्वस्तुसदसद्वाखिला
त्मिके ॥ ८२ ॥ तस्यसर्वस्ययाशक्तिःसात्वंकिंस्तूयसे
तदा ॥ ययात्वयाजगत्स्रष्टाजगत्पात्यत्तियोजगत् ॥

८३ ॥ सोपिनिद्रावशंनीतःकस्त्वांस्तोतुमिहेश्वरः
विष्णुःशरीरग्रहणमहमीशानएवच ॥ ८४ ॥
कारितास्तेयतोतस्त्वांकःस्तोतुंशक्तिमान्भवेत् ॥
सात्वमित्थंप्रभावैःस्वैरुदारैर्देविसंस्तुता ॥ ८५ ॥ मो
हयैतौदुराधर्षावसुरौमधुकैटभौ ॥ प्रबोधंचजग

गत्स्वामीनीं यतामच्युतो लघु ।।८६।। बोधश्चक्रि
यतामस्य हंतुमेतौ महासुरौ ।।८७।। ऋषिरुवाच
८८।। एवंस्तुता तदा देवी तामसी तत्र वेधसा ।।८९
विष्णोः प्रबोधनार्थाय निहंतुं मधुकैटभौ ।। नेत्रा
स्यनासिकाबाहुहृदयेभ्यस्तथोरसः ।।९०।। नि

र्गम्य दर्शने तस्थौ ब्रह्मणोव्यक्तजन्मनः ।। उत्तस्थौ
च जगन्नाथस्तया मुक्तो जनार्दन ।।९१।। एकार्णवे
ऽहिशयनात्ततः स ददृशे च तौ ।। मधुकैटभौ दुरा
त्मानावतिवीर्यपराक्रमौ ।।९२।। क्रोधरक्तेक्षणा
वत्तुं ब्रह्माणं जनितोद्यमौ ।। समुत्थाय ततस्ताभ्यां

युयुधे भगवान्हरिः ॥९३॥ पंचवर्षसहस्राणि
बाहुप्रहरणो विभुः ॥ तावप्यतिबलोन्मत्तौ महा
मायाविमोहितौ ॥९४॥ उक्तवंतौ वरोस्मत्तो व्रियतां
मिति केशवं ॥९५॥ भगवानुवाच ॥ ॥९६
भवेतामद्य मे तुष्टौ मम वध्यावुभावपि ॥९७॥

किमन्येन वरेणात्र एतावद्धि वृतं मया ॥९८॥
ऋषिरुवाच ॥ ॥९९ वंचिताभ्यामिति तदा स
र्वमापोमयं जगत् ॥१००॥ विलोक्य ताभ्यां गदितो
भगवान्कमलेक्षणः ॥ आवां जहि न यत्रोर्वी सलि
लेन परिप्लुता ॥१०१॥ ऋषिरुवाच ॥॥१०२ तथे

म.म.
५३



५३

त्युक्त्वाभगवताशंखचक्रगदाभृता ॥ कृत्वाचक्रे
णावैछिन्नेजघनेशिरसीतयोः ॥१०३॥ एवमेषास
मुत्पन्नाब्रह्मणासंस्तुतास्वयं ॥ प्रभावमस्यादेव्या
स्तुभूयःशृणुवदामिते ॥१०४॥ ॥इतिमार्कंडे
यपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येमधु

स.श.
५४

कैटभवधप्रथमोध्यायः उवाच २४ श्लोक ६६ त्र

र्वं २४ ॥ एवं मंत्रः ५२४ ॥ मध्यचरितस्य विष्णुरृ

षिः ॥ उष्णिक्छंदः ॥ महालक्ष्मीर्देवता ॥ शाकंभर

री शक्तिः ॥ दुर्गा बीजं ॥ वायुस्तत्वं ॥ श्री महालक्ष्मी

प्रीत्यर्थं मध्यचरित्रजपे विनियोगः ॥ ऋषिरुवा

५४

च ॥ १ ॥ देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा ॥ महि

षेऽसुराणामधिपे देवानां च पुरंदरे ॥ २ ॥ तत्रासुरै

र्महावीर्यैर्देवसैन्यं पराजितं ॥ जित्वा च सकलान्दे

वानिंद्रोऽभून्महिषासुरः ॥ ३ ॥ ततः पराजिता देवाः

पद्मयोनिं प्रजापतिं ॥ पुरस्कृत्य गतास्तत्र यत्रेश

सप्त.
५५

गरुडध्वजौ ॥ ४ ॥ यथावृत्तं तयोस्तद्वन्महिषासुर-
चेष्टितं ॥ त्रिदशाः कथयामासुर्देवाभिनवविस्तरं
॥ ५ ॥ सूर्येन्द्राग्न्यनिलेन्दूनां यमस्य वरुणस्य च ॥ अ-
न्येषां चाधिकारान्स स्वयमेवाधितिष्ठति ॥ ६ ॥ स्व-
र्गान्निराकृताः सर्वे तेन देवगणा भुवि ॥ विचरं-

ति यथा मर्त्या महिषेण दुरात्मना ॥ ७ ॥ एतद्वः कथि-
तं सर्वममरारिविचेष्टितं ॥ शरणं वः प्रपन्नाः स्मो-
वधस्तस्य विचिन्त्यतां ॥ ८ ॥ इत्थं निशम्य देवानां व-
चांसि मधुसूदनः ॥ चकार कोपं शंभुश्च भ्रुकुटि-
कुटिलाननौ ॥ ९ ॥ ततोतिकोपपूर्णस्य चक्रिणो व

सप्त॰
५६

दनात्ततः॥ निश्चक्राममहत्तेजोब्रह्मणःशंकर
स्यच॥ १०॥ अन्येषांचैवदेवानांशक्रादीनांशरीर
तः॥ निर्गतंसुमहत्तेजस्तच्चैक्यंसमगछत॥ ११॥
अतीवतेजसःकूटंज्वलंतमिवपर्वतं॥ ददृशुस्ते
सुरास्तत्रज्वालाव्याप्तदिगंतरं॥ १२॥ अतुलंतत्र

५६

तत्तेजःसर्व॥
देवशरीरज॥
जं॥ एकस्थंत॥
दभून्नारीव्या॥
प्तलोकत्रयंत्विषा॥



सप्त॰
५१

॥१३॥ यदभूच्छांभवंतेजस्तेनाजायततन्मुखं॥ या
म्येनचाभवन्केशाबाहवोविष्णुतेजसा॥१४॥ सौम्ये
नस्तनयोर्युग्मंमध्यंचैंद्रेणचाभवत्॥ वारुणेनच
जंघोरूनितंबस्तेजसाभुवः॥१५॥ ब्रह्मणस्तेजसापा
दौतदंगुल्योर्कतेजसा॥ वसूनांचकरांगुल्यःकौबेरे

५१

णचनासिका॥१६॥ तस्यास्तुदंताःसंभूताःप्राजाप
त्येनतेजसा॥ नयनत्रितयंजज्ञेतथापावकतेजसा
॥१७॥ भ्रुवौचसंध्ययोस्तेजःश्रवणावनिलस्यच॥ अ
न्येषांचैवदेवानांसंभवस्तेजसांशिवा॥१८॥ ततःस
मस्तदेवानांतेजोराशिसमुद्भवां॥ तांविलोक्यमु

दंष्ट्रापुरमरामद्विषार्दिताः ॥१९॥ शूलंशूलाद्वि
निः कृष्यददौतस्यैपिनाकधृक ॥ मचक्रंचदत्त
वान्कृष्णः समुत्पाद्यस्वचक्रतः ॥२०॥ शंखंचवरु
णः शक्तिंददौतस्यैहुताशनः ॥ मारुतोदत्तवांश्चा
पंबाणपूर्णेतथेषुधी ॥२१॥ वज्रमिंद्रः समुत्पाद्यः

कुलिशादमराधिपः ॥ ददौतस्यैसहस्राक्षोघंटा
मैरावताद्गजात् ॥२२॥ कालदंडाद्यमोदंडंपाशंचां
बुपतिर्ददौ ॥ प्रजापतिश्चाक्षमालांददौब्रह्माकमं
डलुं ॥२३॥ समस्तरोमकूपेषुनिजरश्मीन्दिवाकरः
॥ कालश्चदत्तवान्खड्गंतस्याश्चर्मचनिर्मलं ॥२४॥

स.स०
५९

क्षीरोदश्चामलंहारमजरेचतथांबरे।चूडाम
णिंतथादिव्यंकुंडलेकटकानिच॥२५॥अर्द्धचं
द्रंतथाशुभ्रंकेयूरान्सर्वबाहुषु।नूपुरौविम
लौतद्वद्ग्रैवेयकमनुत्तमं॥२६॥अंगुलीयकरत्ना
निसमस्तास्वंगुलीषुच।विश्वकर्माददौतस्यैपर

शुंचातिनिर्मलं॥२७॥अस्त्राण्यनेकरूपाणि
तथाभेद्यंचदंशनं।अम्लानपंकजांमालांशिर
स्युरसिचापरां॥२८॥अददज्जलधिस्तस्यैपंकजं
चातिशोभनं।हिमवान्वाहनंसिंहंरत्नानिविविधा
निच॥२९॥ददावशून्यंसुरयापानपात्रंधनाधिपः।

स.स०

॥ ६० ॥

शेषश्च सर्वनागेशो महामणिविभूषितं ॥ २० ॥
नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमां ॥ अन्यैर
पि सुरैर्देवी भूषणैरायुधैस्तथा ॥ २१ ॥ सम्मानि
ता ननादोच्चैः साट्टहासं मुहुर्मुहुः ॥ तस्या नादेन
घोरेण कृत्स्नमापूरितं नभः ॥ २२ ॥ अमायतातिम

॥ ६० ॥

हता प्रतिशब्दो महानभूत् ॥ चुक्षुभुः सकला लो
काः समुद्राश्च चकंपिरे ॥ २३ ॥ चचाल वसुधा चेलुः
सकलाश्च महीधराः ॥ जयेति देवाश्च मुदा तामूचुः
सिंहवाहिनीं ॥ २४ ॥ तुष्टुवुर्मुनयश्चैनां भक्तिनम्रा
त्ममूर्तयः ॥ दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः

यः ॥३५॥ सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः
आः किमेतदिति क्रोधादाभाष्य महिषासुरः ॥३६॥
अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः ॥ स दद
र्श ततो देवीं व्याप्तलोकत्रयां त्विषा ॥३७॥ पादा
क्रान्त्या नतभुवं किरीटोल्लिखिताम्बरां ॥ क्षोभिता

शेषपातालां धनुर्ज्यानिःस्वनेन तां ॥३८॥ दिशो भुज
सहस्रेण समंताद्व्याप्य संस्थितां ॥ ततः प्रववृते यु
द्धं तया देव्या सुरद्विषां ॥३९॥ शस्त्रास्त्रैर्बहुधा मु
क्तैरादीपितदिगंतरं ॥ महिषासुरसेनानीश्चिक्षु
राख्यो महासुरः ॥४०॥ युयुधे चामरश्चान्यैश्चतु

सप्त०
६२

तुरंगबलान्वितः॥ रथानामयुतैः षड्भिरुद्
ग्राख्यो महासुरः॥४१॥ अयुध्यतायुतानां च सह
स्रेण महाहनुः॥ पंचाशद्भिश्च नियुतैरसि
लोमा महासुरः॥४२॥ अयुतानां शतैः षड्भिर्बाष्क
लो युयुधे रणे॥ गजवाजिसहस्रौघैरनेकैः परि

६२

वारितः॥४३॥ वृतो रथानां कोट्या च युद्धे तस्मिन्न
युध्यत॥ बिडालाख्योयुतानां च पंचाशद्भिरथा
युतैः॥४४॥ युयुधे संयुगे तत्र रथानां परिवारि
तः॥ अन्ये च तत्रायुतशो रथनागहयैर्वृताः॥
४५॥ युयुधुः संयुगे देव्या सह तत्र महासुराः॥ को

स.स. ६२

टिकोटिसहस्रैस्तुरथानांदंतिनांतथा॥४६॥ह
यानांचवृतोयुद्धेतत्राभून्महिषासुरः॥तोमरै
र्भिंडिपालैश्चशक्तिभिर्मुशलैस्तथा॥४७॥युयु
धुःसंयुगेदेव्याखड्गैःपरशुपट्टिशैः॥केचिच्च
चिक्षिपुःशक्तीःकेचित्पाशांस्तथापरे॥४८॥दे

६२

वींखड्गप्रहारैस्तुतेतांहंतुंप्रचक्रमुः॥सापि
देवीततस्तानिशस्त्राण्यस्त्राणिचंडिका॥४९
लीलयैवप्रचिच्छेदनिजशस्त्रास्त्रवर्षिणी॥अ
नायस्ताननादेवीस्तूयमानासुरर्षिभिः॥५०॥
मुमोचासुरदेहेषुशस्त्राण्यस्त्राणिचेश्वरी॥सो

पिक्रुद्धोधुतसटोदेव्यावाहनकेसरी॥५०॥च
चारासुरसैन्येषुवनेंष्विवहुताशनः॥निःश्वा
सान्मुमुचेयांश्चयुध्यमानारणेंबिका॥५२॥तए
वसद्यःसंभूतागणाःशतसहस्रशः॥युयुधुस्ते
परशुभिर्भिंडिपालासिपट्टिशैः॥५३॥नाशयं

तोसुरगणान्देवीशक्त्युपबृंहिताः॥अवाद
यंतपटहान्गणाःशंखांस्तथापरे॥५४॥मृदंगां
श्चतथैवान्येतस्मिन्युद्धमहोत्सवे॥ततोदेवीत्रि
शूलेनगदयाशक्तिवृष्टिभिः॥५५॥खड्गादिभि
श्चशतशोनिजघानमहासुरान्॥पातयामास

म.म.
६५

चैवान्यान्घंटास्वनविमोहितान् ॥५६॥ असुरा
न्भुविपाशेनबध्वाचान्यानकर्षयत् ॥ केचिद्वि-
धाकृतास्तीक्ष्णैःखड्गपातैस्तथापरे ॥५७॥ विपो
थितानिपातेनगदयाभुविशेरते ॥ वेमुश्चके-
चिद्रुधिरंमुशलेनभृशंहताः ॥५८॥ केचिन्निप-

६५

तिताभूमौभिन्नाःशूलेनवक्षसि ॥ निरंतराःश-
रौघेणकृताःकेचिद्रणाजिरे ॥५९॥ सेनानुकारि
णःप्राणान्मुमुचुस्त्रिदशार्दनाः ॥ केषांचिद्बाह-
वश्छिन्नाश्छिन्नग्रीवास्तथापरे ॥६०॥ शिरांसिपे
तुरन्येषामन्येमध्येविदारिताः ॥ विच्छिन्नजंघा-

स्त्वपरेपेतुरुर्व्यांमहासुराः ॥६१॥ एकबाह्वक्षि
चरणाः केचिद्देव्याद्विधाकृताः ॥ छिन्नेपिचान्ये
शिरसिपतिताः पुनरुत्थिताः ॥६२॥ कबंधायुयु
धुर्देव्यागृहीतपरमायुधाः ॥ ननृतुश्चापरेतत्र
युद्धेतूर्यलयाश्रिताः ॥६३॥ कबंधाश्छिन्नशिरसः

खड्गशक्त्यृष्टिपाणयः ॥ तिष्ठतिष्ठेतिभाषंतो देवी
मन्येमहासुराः ॥६४॥ पातितैरथनागाश्वैरसुरै
श्चवसुंधराः ॥ अगम्यासाभवत्तत्रयत्राभूत्समहा
रणाः ॥६५॥ शोणितौघामहानद्यः सद्यस्तत्रविसुस्रु
स्रुवुः ॥ मध्येचासुरसैन्यस्यवारणासुरवाजिनां ॥

॥६६॥ क्षणेनतन्महासैन्यमसुराणांतदांबिका ॥ नि
न्येक्षयंयथावह्निस्तृणदारुमहाचयं ॥६७॥ सचसिं
होमहानादमुत्सृजन्धूतकेसरः ॥ शरीरेभ्योमरारी
णामसूनिवविचिन्वति ॥६८॥ देव्यागणैश्चतैस्तत्र
कृतंयुद्धंतथासुरैः ॥ यथैषांतुतुषुर्देवाः पुष्पवृष्टि



सप्त०
६८

स्तुचोदिवि ॥ ६९ ॥ ॥ इतिश्रीमार्कंडेयपुराणेसा
वर्णिकेमन्वंतरेदेवीमाहात्म्येमहिषासुरसैन्यव
धः ॥ उवाच ॥ अर्ध० श्लोक ६८ ॥ एवं ६९ ॥ एवमादि
मंत्र १७३ ॥ ऋषिरुवाच ॥ ॥ १ ॥ निहन्यमानंतत्सैन्य
मवलोक्यमहासुरः ॥ सेनानीश्चिक्षुरः कोपाद्ययौ

६८

योद्धुमथांबिकां ॥ २ ॥ सदेवींशरवर्षेणववर्षसम
रेसुरः ॥ यथामेरुगिरेः शृंगंतोयवर्षेणतोयदः
॥ ३ ॥ तस्यछित्वाततोदेवीलीलयैवशरोत्करान्
जघानतुरगान्बाणैर्यंतारंचैववाजिनां ॥ ४ ॥ चि
च्छेदचधनुःसद्योध्वजंचातिसमुच्छ्रितं ॥ विव्याधच

म.म.
६९

श्चैवगात्रेषु छिन्नधन्वानमास्थगेः॥५॥ सछिर
न्नधन्वाविरथोहताश्वोहतसारथिः॥ अभ्यधा
वततांदेवींखड्गचर्मधरोसुरः॥६॥ सिंहमाहृ
त्यखड्गेनतीक्ष्णधारेणमूर्द्धनि॥ आजघानभु
जेसव्येदेवीमप्यतिवेगवान्॥७॥ तस्याःखड्गोभु

६९

८५

जंप्राप्यपफालनंदन॥ ततोजग्राहशूलंसको
पादरुणलोचनः॥८॥ चिक्षेपचततस्तत्तुभद्रका
ल्यांमहासुरः॥ जाज्वल्यमानंतेजोभिरविबिंब
मिवांबरात्॥९॥ दृष्ट्वातदापतच्छूलंदेवीशूलम
मुंचत॥ तच्छूलंशतधातेननीतंसचमहासुरः॥

सप्त.
७०

॥१०॥ इतेतस्मिन्महावीर्येमहिषस्यचमूपतो॥
आजगामगजारूढश्चामरस्त्रिदशार्दनः॥११॥
सोपिशक्तिंमुमोचाथदेव्यास्तामंबिकाद्रुतं॥ हुं
काराभिहतांभूमौपातयामासनिष्प्रभां॥१२॥
भग्नांशक्तिंनिपतितांदृष्ट्वाक्रोधसमन्वितः॥ ॥

चिक्षेपचामरः शूलंबाणैस्तदपिसाछिनत्॥
॥१३॥ ततःसिंहःसमुत्पत्यगजकुंभांतरस्थितः॥ बा
हुयुद्धेनयुयुधेतेनोच्चैस्त्रिदशारिणा॥१४॥ युध्य
मानौततस्तौतुतस्मान्नागान्महींगतौ॥ युयुधा
तेतिसंरब्धौप्रहारैरतिदारुणैः॥१५॥ ततोवेगा

स.स.
७१

स्तमुत्पत्यनिपत्यचमृगारिणा।करप्रहारेण
शिरश्चामरस्यपृथक्कृतं।१६।उदग्रश्चरणे
देव्याशिलावृक्षादिभिर्हतः।दंतमुष्टितलैश्चै
वकरालश्चनिपातितः।१७।देवीक्रुद्धागदापा
तैश्चूर्णयामासचोद्धतं।बाष्कलंभिंडिपालेन

७१

बाणैस्ताम्रंतथांधकं।१८।उग्रास्यमुग्रवीर्यंच
तथैवचमहाहनुं।त्रिनेत्राचत्रिशूलेनजघा
नपरमेश्वरी।१९।बिडालस्यासिनाकायात्पात
यामासवैशिरः।दुर्धरंदुर्मुखंचोभौशरैर्निन्ये
यमक्षयं।२०।एवंसंक्षीयमाणेतुस्वसैन्येमही

सप्त·
१२

षासुरः॥माहिषेणस्वरूपेणत्रासयामासतान्गा
णान्॥२१॥कांश्चित्तुंडप्रहारेणखुरक्षेपैस्तथापरा
न्॥लांगूलताडितांश्चान्यान्शृंगाभ्यांचविदारिता
न्॥२२॥वेगेनकांश्चिदपरान्नादेनभ्रमणेनच॥निः
श्वासपवनेनान्यान्पातयामासभूतले॥२३॥नि

१२

पात्यप्रमथानीकमभ्यधावतसोसुरः॥सिंहं
हंतुंमहादेव्याःकोपंचक्रेततोंबिका॥२४॥
सोपिकोपान्महावीर्यःखुरक्षुण्णमहीतलः

शृंगाभ्यांप
र्वतांश्चि
क्षेपच
ननादच
२५ वेगभ्र



मणविक्षुण्णमहीतस्यव्यशीर्यत ॥ लांगूलेनाहु
तश्चाब्धिःप्लावयामाससर्वतः ॥ २६ ॥ धुतशृंगविभि
न्नाश्चखंडंखंडंययुर्घनाः ॥ श्वासानिलास्ताःश
तशोनिपेतुर्नभसोचलाः ॥ २७ ॥ इतिक्रोधसमाध्
मातंमापतंतंमहासुरं ॥ दृष्ट्वासाचंडिकाकोपंत

म.म० ७४

द्धायतदाकरोत् ॥२८॥ साक्षिप्वातस्यवैपाशंतं
बबंधमहासुरं ॥ तत्याजमाहिषंरूपंसोपिबद्धो
महामृधे ॥२९॥ ततःसिंहोभवत्सद्योयावत्तस्यांबि
काशिरः ॥ छिनत्तितावत्पुरुषःखड्गपाणिरदृश्यत
॥३०॥ ततएवाशुपुरुषंदेवीचिच्छेदसायकैः ॥ तंख

७४

खड्गचर्मणासार्धंततःसोभून्महागजः ॥३१॥ कर
रेणचमहासिंहंतंचकर्षजगर्जच ॥ कर्षतस्तुक
रंदेवीखड्गेननिरकृंततः ॥३२॥ ततोमहासुरो
भूयोमाहिषंवपुरास्थितः ॥ तथैवक्षोभयामास
त्रैलोक्यंसचराचरं ॥३३॥ ततःक्रुद्धाजगन्माताचं

ण्डिकापानमुत्तमं ॥ पपौपुनः पुनश्चैवजहासारु
णलोचना ॥३४॥ ननर्द्दचासुरः सोपिबलवीर्यम
दोद्धतः ॥ विषाणाभ्यांचचिक्षेपचंडिकांप्रतिभूधरा
न् ॥३५॥ साचतान्प्रहितांस्तेनचूर्णयंतीशरोत्क
रैः ॥ उवाचतंमदोद्धूतमुखरागाकुलाक्षरं ॥३६॥

देव्युवाच ॥ ॥३७॥ गर्जगर्जक्षणंमूढमधुयावत्
पिबाम्यहं ॥ मयात्वयिहतेत्रैवगर्जिष्यंत्याशुदे
वताः ॥३८॥ ऋषिरुवाच ॥ ॥३९॥ एवमुक्त्वासमु
त्पत्यसारूढातंमहासुरं ॥ पादेनाक्रम्यकंठेचशू
लेनैनमताडयत् ॥४०॥ ततः सोपिपदाक्रांत

म०स०
७९

स्तयानिजमुखात्ततः॥ अर्द्धनिःक्रांतएवाति

देव्यावीर्येणसंवृतः॥४१॥ अर्धनिष्क्रांतएवासौ

युध्यमानोमहासुरः॥ तयामहासिनादेव्याशिर

श्छित्वानिपातितः॥४२॥ ततोहाहाकृतंसर्वंदै

त्यसैन्यंननाशतत्॥ प्रहर्षंचपरंजग्मुःसक

७९



स.स.
७१

सा देवतागणाः ॥ ४२ ॥ तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः ॥ जगुर्गंधर्वपतयो ननृतुश्चाप्सरोगणाः ॥ ४४ ॥ इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये महिषासुरवधो नाम तृतीयोध्यायः ॥ उवाच ३ श्लो ४१ एवं ४४ ॥ एवमंत्राः ॥ २२१ ॥

७१

॥ ऋषिरुवाच ॥ ॥ १ ॥ शक्रादयः सुरगणा निहतेतिवीर्ये तस्मिन्दुरात्मनि सुरारिबले च देव्या ॥ तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥ २ ॥ देव्या यया ततमिदं जगदात्मशक्त्या निश्शेषदेवगणशक्तिसमुह

ल्या ॥ तामंबिकामखिलदेवमहर्षिपूज्यांभक्त्यान
ताःस्मविदधातुशुभानिसानः ॥३॥ यस्याःप्रभाव
मतुलंभगवाननंतोब्रह्माहरश्चनहिवक्तुमलं
बलंच ॥ साचंडिकाखिलजगत्परिपालनायनाशा
यचाशुभभयस्यमतिंकरोतु ॥४॥ याश्रीःस्वयंसु॰

कृतिनांभवनेष्वलक्ष्मीःपापात्मनांकृतधियां
हृदयेषुबुद्धिः ॥ ॥श्रद्धासतांकुलजनप्रभवस्य
लज्जातांत्वांनताःस्मपरिपालयदेविविश्वं ॥५॥
किंवर्णयामतवरूपमचिंत्यमेतत्किंचातिवीर्य
मसुरक्षयकारिभूरि ॥ किंचाहवेषुचरितानि॰

तवाहृतानिसर्वेषुदेव्यसुरदेवगणादिकेषु॥
६॥ हेतुःसमस्तजगतांत्रिगुणापिदोषैर्नज्ञायसे
हरिहरादिभिरप्यपारा॥ सर्वाश्रयाखिलमिदं
जगदंशभूतमव्याकृताहिपरमाप्रकृतिस्त्वमा
द्या॥ ७॥ यस्याःसमस्तसुरतासमुदीरणेनतृप्तिं

प्रयातिसकलेषुमखेषुदेवि॥ स्वाहासिवैपितृ
गणस्यचतृप्तिहेतुरुच्चार्यसेत्वमतएवजनैःस्व
धाच॥ ८॥ यामुक्तिहेतुरविचिंत्यमहाव्रताचत्वम
भ्यस्यसेसुनियतेंद्रियतत्वसारैः॥ मोक्षार्थिभिर्
मुनिभिरस्तसमस्तदोषैर्विद्यासिसाभगवतीप

रमाद्दिदेवी ॥ ९ ॥ शब्दात्मिका सुविमलर्ग्यजुषां
निधानमुद्गीथरम्यपदपाठवतां च साम्नां ॥ दे
वि त्रयी भगवती भवभावनाय वार्त्ता च सर्वज
गतां परमार्त्तिहंत्री ॥ १० ॥ मेधासि देवि विदिता
खिलशास्त्रसारा दुर्गासि दुर्गभवसागरनौरसं

गा ॥ श्रीः कैटभारिहृदयैककृताधिवासा गौरी
त्वमेव शशिमौलिकृतप्रतिष्ठा ॥ ११ ॥ ईषत्सहा
सममलं परिपूर्णचंद्रबिंबानुकारि कनकोत्त
मकांतिकांतं ॥ अत्यद्भुतं प्रहृतमात्तरुषा तथा
पि वक्त्रं विलोक्य सहसा महिषासुरेण ॥ १२ ॥ दृ

मम॰
८१

ष्ट्वातुदेविकुपितंभ्रुकुटीकरालमुद्यछशांक
सदृशछवियन्नसद्यः॥प्राणान्मुमोचमहिषस्
तदतीवचित्रंकैर्जीव्यतेहिकुपितांतकदर्शने
न॥१३॥देविप्रसीदपरमाभवतीभवायसद्योवि
नाशयसिकोपवतीकुलानि॥विज्ञातमेतदधु

८१

नैवयदस्तमेतन्नीतंबलंसुविपुलंमहिषासु
रस्य॥१४॥तेसम्मताजनपदेषुधनानितेषांते
षांयशांसिनचसीदतिधर्मवर्गः॥धन्यास्तएवनि
भृतात्मजभृत्यदारायेषांसदाभ्युदयदाभवती
प्रसन्ना॥१५॥धर्म्याणिदेविसकलानिसदैवक

सप्त·
८२

र्माण्यत्याहृतःप्रतिदिनंसुकृतीकरोति॥स्वर्गं
प्रयातिचततोभवतीभसादाक्षोकत्वयेपिफल
दाननुदेवितेन॥२६॥दुर्गेस्मृताहरसिभीतिमशे
षजंतोःस्वस्थैःस्मृतामतीमतीवशुभांददासि॥दा
रिद्र्यदुःखभयहारिणिकात्वदन्यासर्वोपकार

८२

करणायसदार्द्रचित्ता॥२७॥एभिर्हतैर्जगदुपैति
सुखंतथैतेकुर्वंतुनामनरकायचिरायपापं॥सं
ग्राममृत्युमधिगम्यदिवंप्रयांतुमत्वेतिनूनमहि
तान्विनिहंसिदेवि॥२८॥दृष्ट्वैवकिंनभवतीप्रकरो
तिभस्मसर्वासुरानरिषुयत्प्रहिणोषिशस्त्रं॥लो

म०स०
८२

कान्त्यायांतुरिपवोपिहिशस्त्रपूताइत्थंमतिर्भव
तितेषुपितेतिसाध्वी॥१९॥खड्गप्रभानिकरविस्फु
रणैस्तथोग्रैःशूलाग्रकांतिनिवहेनदृशोसुरा
णां॥यन्नागताविलयमंशुमदिंदुखंडयोग्यान
नंतवविलोकयतांतदेतत्॥२०॥दुर्वृत्तःवृत्तश

८२

मनंतवदेविशीलंरूपंतथैतदविचिंत्यमतु
ल्यमन्यैः॥वीर्यंचहंतृहृतदेवपराक्रमाणांवै
रिष्वपिप्रकटितैवदयात्वयेत्थं॥२१॥केनोपमाभ
वतुतेस्यपराक्रमस्यरूपंचशत्रुभयकार्यतिहा
रिकुत्र॥चित्तेकृपासमरनिष्ठुरताचदृष्टात्व

म.म.
८४

य्येवदेविवरदेभुवनत्रयेपि ॥२२॥ त्रैलोक्यमेत
दखिलंरिपुनाशनेनत्रातंत्वयासमरमूर्द्धनि
तेपिहत्वा ॥ नीतादिवंरिपुगणाभयमप्यपास्तम
स्मादनुन्मदसुरारिभवंनमस्ते ॥२३॥ शूलेनपा
हिनोदेविपाहिखड्गेनचांबिके ॥ घंटास्वनेननः

८४

नपाहिचापज्यानिस्वनेनच ॥२४॥ प्राच्यांरक्षप्र
तीच्यांचचंडिकेरक्षदक्षिणे ॥ भ्रामणेनात्मशू
लस्यउत्तरस्यांतथेश्वरि ॥२५॥ सौम्यानियानि
रूपाणित्रैलोक्येविचरंतिते ॥ यानिचात्यर्थघो
राणितैरक्षास्मांस्तथाभुवं ॥२६॥ खड्गशूलगदा

सप्त॰
८५

दीनियानिचास्त्राणितेंबिके॥ करपल्लवसंगी
नितैरस्मान्रक्षसर्वतः॥२७॥ ऋषिरुवाच॥
२८॥ एवंस्तुतासुरैर्दिव्यैःकुसुमैर्नंदनोद्भवैः॥ अ
र्चिताजगतांधात्रीतथागंधानुलेपनैः॥२९॥
भक्त्यासमस्तैस्त्रिदशैर्दिव्यैर्धूपैःसुधूपिता॥ प्रा

८५

ह प्रसादसुमुखीसमस्तान्प्रणतान्सुरान्॥३०॥
देव्युवाच॥ ॥३१॥ व्रियतांत्रिदशाःसर्वेयदस्मत्तो
ऽभिवांछितं॥ ददाम्यहमतिप्रीत्यास्तवैरेभिःसुपू
जिता॥३२॥ देवाऊचुः॥३३॥ भगवत्याकृतंसर्वं
नकिंचिदवशिष्यते॥ यक्ष॥ यदयन्निहतःशत्रु

रस्माकं महिषासुरः॥ यदिवापि वरो देयस्त्वयाऽ
स्माकं महेश्वरि॥३५॥ संस्मृता संस्मृता त्वं नो हिंसे
थाः परमापदः॥ यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यऽ
त्यमलानने॥३६॥ तस्य वित्तर्द्धिविभवैर्धनदाराऽ
दिसंपदां॥ वृह्वयेस्मत्प्रपन्ना त्वं नवेथाः सर्वदांबिके

॥३७॥ ऋषिरुवाच॥ ॥३८॥ इति प्रसादिता देवैर्जग
तोऽर्थे तथात्मनः॥ तथेत्युक्त्वा भद्रकाली बभूवांऽ
तर्हिता नृप॥३९॥ इत्येतत्कथितं भूप संभूता सा
यथा पुरा॥ देवी देवशरीरेभ्यो जगत्रयहितैषिणी
॥४०॥ पुनश्च गौरीदेहात्सा समुद्भूता यथाभवत्

सप्त॰
८१

वधायदुष्टदैत्यानांतथाशुंभनिशुंभयोः॥५१॥
रक्षणायचलोकानांदेवानामुपकारिणी॥तच्छृ
णुष्वमयाख्यातंयथावत्कथयामिते॥५२॥ ॥इ
तिमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहा
त्म्येशक्रादयस्तुतिर्नामचतुर्थोध्यायः॥४॥

८१



सप्त०
८८

॥ उवाच ॥ ५ ॥ अर्ध ॥ २ ॥ श्लोकाः ॥ ३५ ॥ एवं ॥ ४२ ॥ एवमादि
मंत्र ॥ २५९ ॥ उत्तरचरितस्य रुद्र ऋषिः ॥ महा
सरस्वती देवता ॥ जगती छंदः ॥ भीमा शक्तिः ॥
भ्रामरी बीजं ॥ सूर्यस्तत्वं ॥ श्रीमहासरस्वती
प्रीत्यर्थं उत्तरचरित्रजपे विनियोगः ॥ ॥ ऋषि

८८

रुवाच ॥ पुरा शुंभनिशुंभाभ्यामसुराभ्यां शची
पतेः ॥ त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रया
त् ॥ २ ॥ तावेव सूर्यतां तद्वदधिकारं तथैंदवं ॥ कौ
वेरमथ याम्यं च चक्राते वरुणस्य च ॥ ३ ॥ तावे
व पवनर्द्धिं च चक्रतुर्वह्निकर्म च ॥ ततो देवा

सप्त० विनिर्धूताभ्रष्टराज्याः पराजिताः॥४॥हृताधि
८९ कारास्त्रिदशास्ताभ्यां सर्वे निराकृताः॥महासु
राभ्यां तां देवीं संस्मरंत्यपराजितां॥५॥तयास्मा
सु॰ कं वरो दत्तो यथापत्सु स्मृताखिलाः॥भवतां नाश
यिष्यामि तत्क्षणात्परमापदः॥६॥इति कृत्वा ८९

मतिं देवा हिमवंतं नगेश्वरं॥जग्मुस्तत्र ततो दे
वीं विष्णुमायां प्रतुष्टुवुः॥७॥देवा ऊचुः॥८॥नमो
देव्यै महादेव्यै शिवायै सततं नमः॥नमः प्रकृ
त्यै भद्रायै नियताः प्रणताः स्म तां॥९॥रौद्रायै न
मो नित्यायै गौर्यै धात्र्यै नमो नमः॥ज्योत्स्नायै चेंदु

म॰स॰
९०

दुरूपिण्यै सुखायै सततं नमः॥१०॥ कल्याण्यै
प्रणतां वृद्ध्यै सिद्ध्यै कूर्म्यै नमो नमः। नैर्ऋत्यै भू-
भृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः॥११॥ दुर्गायै दु-
र्गपारायै सारायै सर्वकारिण्यै॥ ख्यात्यै तथैव कृ-
ष्णायै धूम्रायै सततं नमः॥१२॥ अतिसौम्यातिरौ-

९०

द्रायै नतास्तस्यै नमो नमः॥ नमो जगत्प्रतिष्ठा-
यै देव्यै कृत्यै नमो नमः॥१३॥ या देवी सर्वभूतेषु
विष्णुमायेति शब्दिता॥ नमस्तस्यै १४ नमस्तस्यै
१५ नमस्तस्यै नमो नमः॥१६॥ या देवी सर्वभूते-
षु चेतनेत्यभिधीयते॥ नमस्तस्यै १७ नमस्तस्यै

सप्त·
५१

१८ नमस्तस्यैनमोनमः १९ यादेवी० बुद्धिरूपे
णसंस्थिता नमस्तस्यै० २२ यादेवी० निद्रारूपे
णसंस्थिता नमस्तस्यै० २५ यादेवी० क्षुधारू
पेणसंस्थिता नमस्तस्यै० २८ यादेवी० छायारूपे
णसंस्थिता नमस्तस्यै० ३१ यादेवी० शक्तिरूपे

५१

णसंस्थिता नमस्तस्यै० ३४ यादेवी० तृष्णारूपे
णसंस्थिता नमस्तस्यै० ३७ यादेवी· क्षांतिरूपे
णसंस्थिता नमस्तस्यै० ४० यादेवी· जातिरूपे
णसंस्थिता नमस्तस्यै० ४३ यादेवी० लज्जारू
पेणसंस्थिता नमस्तस्यै० ४६ यादेवी० शांतिरू

पेण संस्थिता ॥ नमस्तस्यै० ॥ ४९ ॥ यादेवी० श्रद्धारूपे
ण संस्थिता ॥ नमस्तस्यै० ॥ ५२ ॥ यादेवी० कांतिरूपे
ण संस्थिता ॥ नमस्तस्यै० ॥ ५५ ॥ यादेवी० लक्ष्मीरूपे
ण संस्थिता ॥ नमस्तस्यै० ॥ ५८ ॥ यादेवी० वृत्तिरूपे
ण संस्थिता ॥ नमस्तस्यै० ॥ ६१ ॥ यादेवी० स्मृतिरूपे

ण संस्थिता ॥ नमस्तस्यै० ॥ ६४ ॥ यादेवी० दयारूपेः
ण संस्थिता ॥ नमस्तस्यै० ॥ ६७ ॥ यादेवी० तुष्टिरूपे
ण संस्थिता ॥ नमस्तस्यै० ॥ ७० ॥ यादेवी० मातृरूपे
ण संस्थिता ॥ नमस्तस्यै० ॥ ७३ ॥ यादेवी० भ्रांतिरू
पेण संस्थिता ॥ नमस्तस्यै० ॥ ७६ ॥ इंद्रियाणामधिष्ठा॰

त्रीभूतानामखिलेषुया।भूतेषुसततंतस्यैव्या
प्त्यैदेव्यैनमोनमः॥७७॥चितिरूपेणयाकृत्स्नमे
तद्व्याप्यस्थिताजगत्।नमस्तस्यै७८नमस्तस्यै
७९॥नमस्तस्यैनमोनमः॥८०॥स्तुतासुरैःपूर्वम
भिष्टसंश्रयात्तथासुरेंद्रेणदिनेषुसेविता॥करो

तुसानःशुभहेतुरीश्वरीशुभानिभद्राण्यभिहं
तुचापदः॥८१॥यासांप्रतंचोद्धतदैत्यतापितैर
स्माभिरीशाचसुरैर्नमस्यते।याचस्मृतातत्क्ष
णमेवहंतिनःसर्वापदोभक्तिविनम्रमूर्त्तिभिः॥
८२॥ऋषिरुवाच॥८३॥एवंस्तवाभियुक्तानांदेवा

नां तत्र पार्वती ॥ स्नातुमभ्याययौ तोये जाह्नव्या नृ
पनंदन ॥ ८४ ॥ साब्रवीतान्सुरान्सुभ्रूर्भवद्भिः स्तूय
ते त्र का ॥ शरीरकोशात्तश्चास्याः समुद्भूताब्रवीच्छि
वा ॥ ८५ ॥ स्तोत्रं ममैतत्क्रियते शुंभदैत्यनिराकृ
तैः ॥ देवैः समेतैः समरे निशुंभेन पराजितैः ॥

८६ ॥ शरीरकोशाद्यत्तस्याः पार्वत्या निःसृतांबिका
कौशिकीति समस्तेषु ततो लोकेषु गीयते ॥ ८७
तस्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती ॥
कालिकेति समाख्याता हिमाचलकृताश्रया ॥ ८८
ततोंबिकां परं रूपं बिभ्राणां सुमनोहरं ॥ ददर्श

चंडोमुंडश्चभृत्यौशुंभनिशुंभयोः॥८८॥ताभ्यां
शुंभायचाख्याताअतीवसुमनोहरा॥काप्यास्ते
स्त्रीमहाराजभासयंतीहिमाचलं॥८९॥नैवता
दृक्क्वचिद्रूपंदृष्टंकेनचिदुत्तमं॥ज्ञायतांकाप्य
सौदेवीगृह्यतांचासुरेश्वर॥९०॥स्त्रीरत्नमतिचा

र्वंगीद्योतयंतीदिशास्त्विषा॥सातुतिष्ठतिदैत्यें
द्रतांभवान्द्रष्टुमर्हति॥९१॥यानिरत्नानिमणयो
गजाश्वादीनिवैप्रभो॥त्रैलोक्येतुसमस्तानि
सांप्रतंभांतितेगृहे॥९२॥ऐरावतःसमानीतोग
जरत्नंपुरंदरात्॥पारिजाततरुश्चायंतथैवोच्चैः

सप्त॰
९६

श्रवा हयः ॥९४॥ विमानं हंससंयुक्तमेतत्तिष्ठति
ते गृहे ॥ रत्नभूतमिहानीतं यदासीद्वेधसोऽद्भुतं
॥९५॥ निधिरेष महापद्मः समानीतो धनेश्वरात्
किंजल्किनीं ददौ चाब्धिर्मालामम्लानपंकजां ॥
॥९६॥ छत्रं ते वारुणं गेहे कांचनस्रावि तिष्ठति ॥ त-

९६

था यं स्यंदनवरो यः पुरासीत्प्रजापतेः ॥९७॥ मृ-
त्योरुत्क्रांतिदा नाम शक्तिरीश त्वयाहृता ॥ पाशः
सलिलराजस्य भ्रातुस्तव परिग्रहे ॥९८॥ निशुं-
भस्याब्धिजाताश्च समस्ता रत्नजातयः ॥ वह्निर-
पि ददौ तुभ्यमग्निशौचे च वाससी ॥९९॥ एवं दै-

स.स.
९१

त्येंद्ररत्नानिसमस्तान्याहृतानिते ॥ स्त्रीरत्नमे
षाकल्याणीत्वयाकस्मान्नगृह्यते ॥१००॥ ऋ
षिरुवाच ॥१०१॥ निशम्येतिवचःशुंभःसतदा
चंडमुंडयोः प्रेषयामाससुग्रीवंदूतंदेव्यामहा
सुरं ॥१०२ इतिचेतिचवक्तव्यासागत्वावचनान्म म ९१

॥ यथाचाभ्येतिसंप्रीत्यातथाकार्यंत्वयालघु
॥३॥ सतत्रगत्वायत्रास्तेशैलोद्देशेतिशोभने ॥ सा
देवीतांततःप्राहश्लक्ष्णंमधुरयागिरा ॥४॥ दूत
उवाच ॥५ देविदैत्येश्वरःशुंभस्त्रैलोक्येपरमेश्व
रः ॥ दूतोहंप्रेषितस्तेनत्वत्सकाशमिहागतः ॥६

सप्त.
५८

अव्याहताज्ञः सर्वासुयः सदादेवयोनिषु निर्जि
ताखिलदैत्यारिः सयदाहशृणुष्वतत् ७ ममत्रै
लोक्यमखिलंममदेवावशानुगाः यज्ञभागानहं
सर्वानुपाश्नामिपृथक्पृथक् ८ त्रैलोक्येवररत्
नानिममवश्यान्यशेषतः तथैवगजरत्नंच

५८

हृतंदेवेंद्रवाहनं ९ क्षीरोदमथनोद्भूतम
श्वरत्नंममामरैः उच्चैःश्रवससंज्ञं तत्प्रणि
पत्यसमर्पितं १० यानिचान्यानिदेवेषुगंधर्वेषू
रगेषुच रत्नभूतानिभूतानितानिमय्येवशोभ
ने ११ स्त्रीरत्नभूतांत्वांदेविलोकेमन्यामहेवयं

सप्त॰
९९

सात्वममानुपागच्छयतोरत्ननुजोवयं॥२२॥ मांवा॰
ममानुजंवापिनिष्टुंनमुरुविक्रमं॥ नजत्वंचंच
लापांगीरत्ननूतामिवैयतः॥२३॥ परमैश्वर्यम॰
तुलंप्राप्स्यसेमत्परिग्रहात् एतद्बुध्वासमालोच्य
मत्परिग्रहतांव्रज॥२४॥ ऋषिरुवाच॥॥२५॥ इ॰

९९

त्युक्तासातदादेवीगंभीरांतःस्मितानगौ॥ दुर्गा॰
भगवतीभद्रायये दंधार्यतेजगत्॥२६॥ देव्युवाच॥
॥२७॥ सत्यमुक्तंत्वयानात्रमिथ्याकिंचित्त्वयोदितं
त्रैलोक्याधिपतिःशुंभोनिशुंभस्थापितादृशः॥
२८ किंत्वत्रयत्प्रतिज्ञातंमिथ्यातत्क्रियतेकथं

स॰स॰
१००

श्रूयतामल्पबुद्धित्वात्प्रतिज्ञाया कृता पुरा ॥
१९ ॥ यो मां जयति संग्रामे यो मे दर्प्पं व्यपोहति ॥
यो मे प्रतिबलो लोके स मे भर्त्ता भविष्यति ॥ २० ॥
तदागच्छतु शुंभोत्र निशुंभो वा महासुरः ॥ मां जि
त्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु ॥ २१ ॥ दूत

१००

उवाच ॥ २२ ॥ अवलिप्तासि मैवं त्वं देवि ब्रूहि मम
ग्रतः ॥ त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुंभनिशुंभ
योः ॥ २३ ॥ अन्येषामपि दैत्यानां सर्वे देवा न वै यु
धि ॥ तिष्ठंति संमुखे देवि पुनः स्त्री त्वमेकिका ॥
२४ ॥ इंद्राद्याः सकला देवास्तस्थुर्येषां न संयुगे ॥

स.स.
१०१

॥शुंभादीनांकथंतेषांस्त्रीप्रयास्यसिसंमुखं॥२५॥
सात्वंगच्छमयैवोक्तापार्श्वंशुंभनिशुंभयोः॥केशाक
र्षणनिर्धूतगौरवामागमिष्यसि॥२६॥देव्युवाच
॥२७॥एवमेतद्बलीशुंभोनिशुंभश्चातिवीर्यवान्॥
किंकरोमिप्रतिज्ञामेयदनालोचितापुरा॥२८॥स॰

१०१



स त्वं गच्छ मया प्रोक्तं तेयदेतत्सर्वमादृतः ॥ तदाचक्ष्वासुरेंद्राय स च युक्तं करोतु यत् ॥२९॥ ॥इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये देव्या दूतसंवादः ॥५॥ ॥उवाच ॥१॥ श्लो॰ ॥ त्र्यव दान २२ ॥ श्लोक ५४ ॥ एवं २९ ॥ एवमादि मंत्रः ३३८

॥ऋषिरुवाच ॥१॥ इत्याकर्ण्य वचो देव्याः स दूतोमर्षपूरितः ॥ समाचष्ट समागम्य दैत्यराजाय विस्तरात् ॥१॥ तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः ॥ सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनं ॥२॥ हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः ॥ ताम

सप्त०
१०३

नयबला दुष्टांकेशाकर्षणविह्वलां॥४॥तत्प
रित्राणदःकश्चिद्यदिवोत्तिष्ठतेपरः॥सहंतव्योम
रोवापियक्षोगंधर्वएववा॥५॥ऋषिरुवाच॥६॥
तेनाज्ञप्तस्ततःशीघ्रंसदैत्योधूम्रलोचनः॥हतः
षष्ठ्यासहस्त्राणामसुराणांद्रुतंययौ॥७॥सदृष्ट्वातां

१०३

ततोदेवींतुहिनाचलसंस्थितां॥जगादोच्चैःप्रयाः
हीतिमूलंशुंभनिशुंभयोः॥८॥नचेत्प्रीत्याद्यभ
वतीमद्भर्तारमुपैष्यसि॥ततोबलान्नयाम्येष
केशाकर्षणविह्वलां॥९॥देव्युवाच॥१०॥दै
त्येश्वरेणप्रहितोबलवान्बलसंवृतः॥बलान्न

यमिमामेव ततः किं ते करोम्यहं ॥११॥ ऋषिरु
वाच ॥१२॥ इत्युक्तः सोभ्यधावत्तामसुरो धूम्रलो
चनः ॥ हुंकारेणैव तं भस्म सा चकारांबिका ततः ॥
१३ ॥ अथ क्रुद्धं महासैन्यमसुराणां तथांबिका ॥
ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरस्वधैः ॥१४

ततो धूतसटः कोपात्कृत्वा नादं सुभैरवं ॥ पपा
तासुरसेनायां सिंहो देव्याः स्ववाहनः ॥१५॥ कांश्चित्क
रप्रहारेण दैत्यानास्येन चापरान् ॥ आक्रांत्या चाध
स रेणान्यान् जघान महासुरान् ॥१६॥ केषांचित्पाट
यामास नखैः कोष्ठानि केसरी ॥ तथा तलप्रहारे

सप्त॰
१०५

णाशिरांसिकृतवान्पृथक ॥१७॥ विछिन्नबा-
हुशिरसःकृतास्तेनतथापरे॥ पपौचरुधिरं-
कोष्टादन्येषांधुतकेसरः॥१८॥ क्षणेनतद्बलंसर्वं-
क्षयंनीतंमहात्मना॥ तेनकेसरिणादेव्यावाहने-
नातिकोपना ॥१९॥ श्रुत्वातमसुरंदेव्यानिहतंधू-

म्रलोचनं॥ बलंचक्षपितंकृत्स्नंदेवीकेसरिणात-
तः॥२०॥ चुकोपदैत्याधिपतिश्शुंभःप्रस्फुरिताधरः॥
आज्ञापयामासचतौचंडमुंडौमहासुरौ ॥२१॥ हे-
चंडहेमुंडबलैर्बहुभिःपरिवारितौ ॥ तत्रगछत-
गत्वाचसासमानीयतांलघु ॥२२॥ केशेष्वाकृष्य-



बधावायदिवःसंज्ञायोयुधि ॥ तदाशेषायुधैःस
र्वैरसुरैर्विनिहन्यता ॥२४॥ तस्यांहतायांदुष्टायांमि
हेचविनिपातिते ॥ शीघ्रमागम्यतांबध्वाग्रहित्वार
तामघांबिकां ॥२५॥ ॥इतिमार्कंडेयपुराणेसाव
र्णिकेमन्वंतरेदेवीमाहात्म्येधूम्रलोचनवधः॥६

सस·
१०९

उवाच॥४॥अर्द्ध श्लोक२०॥एवं२४॥एवमादिमं
त्रः॥७१२॥ऋषिरुवाच॥ ॥१॥आज्ञप्तास्ते ततो
दैत्याश्चंडमुंडपुरोगमाः चतुरंगबलोपेता
ययुरभ्युद्यतायुधाः॥२॥ददृशुस्ते ततो देवीमी
षद्धासां व्यवस्थितां॥सिंहस्योपरि शैलेंद्रशृंगे म

हति कांचने॥३॥ते दृष्ट्वा तां समादातुमुद्यमं चक्रु
रुद्यताः॥आकृष्टचापासिधरास्तथान्ये तत्समीप
गाः॥४॥ततः कोपं चकारोच्चैरंबिका तानरीन्प्रति॥
कोपेन चास्या वदनं मषीवर्णमभूत्तदा॥५॥भ्रुकु
टिकुटिलात्तस्या ललाटफलकाद्द्रुतं॥काली क

रालवदनाविनिःक्रांतासिपाशिनी ॥५॥ विचि
त्रखट्वांगधरानरमालाविभूषणा ॥६॥ द्वीपिचर्म
परीधानाशुष्कमांसातिभैरवा ॥७॥ अतिविस्ता
रवदनाजिह्वाललनभीषणा ॥ निमग्नारक्तन
यनानादापूरितदिङ्मुखा ॥८॥ सावेगेनाभिप

ति॥ति

घातयंतीमहासुरान् ॥ सैन्येतत्रसुरारीणामभ
क्षयततद्बलं ॥ पार्ष्णिग्राहांकुशग्राहीयोधघं
टासमन्वितान् ॥ समादायैकहस्तेनमुखेचि
क्षेपवारणान् ॥१०॥ तथैवयोधंतुरगैरथंसा
रथिनासह ॥ निक्षिप्यवक्त्रेदशनैश्चर्वयंत्यति

सप्त॰

१०७

नैरवं ।। ११ ।। एकंजग्राहकेशेषुग्रीवायामथचा-
परं ।। पादेनाक्रम्यचैवान्यमुरसान्यमपोथय-
त् ।। १२ ।। तैर्मुक्तानिचशस्त्राणिमहास्त्राणितथा-
सुरैः ।। मुखेनजग्राहरुषा दशनैर्मथितान्य-
पि ।। १३ ।। बलीनांतद्बलंसर्वमसुराणांमहात्मनां

१०७

ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा ।।
१४ ।। असिनानिहतांकेचित्केचित्खट्वांगताडि-
ताः ।। जग्मुर्विनाशमसुरादंताग्राभिहतास्तथा ।।
१५ ।। क्षणेनतद्बलंसर्वमसुराणांनिपातितं ।।
दृष्ट्वाचंडोभिदुद्रावतांकालीमतिभीषणां ।। १६

स॰स॰
११७

॥१६॥ र्दुःसारवैर्षैर्महाभीमैर्भीमाक्षींतांमहासुराः ॥
छादयामासचक्रैश्चमुंडक्षिप्तैःसहस्रशः ॥१७॥
तानिचक्राण्यनेकानिविशमानानितन्मुखं ॥ ब
भुर्यथार्कबिंबानिसुबहूनिघनोदरं ॥१८॥ ततोज
हासातिरुषाभीमंभैरवनादिनी ॥ कालीकराल

११०

वदना ॥ वक्त्रांतर्दुर्दर्शदशनोज्वला ॥१९॥ उत्थाय
चमहासिंहंदेवीचंडमधावत ॥ गृहीत्वाचास्यके
शेषुशिरस्तेनासिनाच्छिनत् ॥२०॥ अथमुंडोभ्य
धावत्तांदृष्ट्वाचंडंनिपातितं ॥ तमप्यपातयद्भूमौ
खड्गाभिहतंरुषा ॥२१॥ हतःशेषंततःसैन्यंदृष्ट्वा

सप्त·
१११

चंडं निपातितं मुंडं च सुमहावीर्यं दिशो नेनेनया
तुरं ॥२२॥ शिरश्चंडस्य काली च गृहीत्वा मुंडमेव च ॥
प्राह सचंडाट्टहासमिश्रमन्येति चंडिकां ॥२३॥ म
यातवात्रोपहृतौ चंडमुंडौ महापशू ॥ युद्धयज्ञे स्व
यं शुंभं निशुंभं च हनिष्यसि ॥२४॥ ऋषिरुवाच ॥

१११

॥२४॥ तावानीतौ ततो दृष्ट्वा चंडमुंडौ महासुरौ ॥ उ
वाच कालीं कल्याणी ललितं चंडिका वचः ॥२६॥ य
स्माच्चंडं च मुंडं च गृहीत्वा त्वमुपागता ॥ चामुंडेति
ततो लोके ख्याता देवि भविष्यति ॥२७॥२५॥ ॥ इ
ति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमा



हात्म्ये चंडमुंडवधः ॥७॥ ॥ ॥उवाच॥२॥ श्लोक॥२५॥ एवं॥२७॥ एवमादिमंत्रा॥४३९॥ ऋषिरुवाच॥ चंडे च निहते दैत्ये मुंडे च विनिपातिते ॥ बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥२॥ ततः कोपपराधीनचेताः शुंभः प्रतापवान् ॥ उद्योगं सर्वसैन्

न्यानांदैत्यानामादिदेशह ॥३॥ अद्यसर्वबलैर्दै
त्याःषडशीतिरुदायुधाः ॥ कंबूनांचतुरशीतिर्नि
र्यांतुस्वबलैर्वृताः ॥४॥ कोटिवीर्याणिपंचाशदसुर
राणांकुलानिवै ॥ शतंकुलानिधौम्राणांनिर्गच्छंतु
ममाज्ञया ॥५॥ कालकादौर्हृदामौर्याःकालकेयास्त

यासुराः ॥ युद्धायसज्जानिर्यांतुआज्ञयात्वरितामर
म ॥६॥ इत्याज्ञाप्यासुरपतिःशुंभोभैरवशासनः ॥
निर्जगाममहासैन्यसहस्रैर्बहुभिर्वृतः ॥७॥ आ
यातंचंडिकादृष्ट्वातत्सैन्यमतिभीषणं ॥ ज्यास्वनैः
पूरयामासधरणीगगनांतरं ॥८॥ ततःसिंहोमहा

नादमतीवकृतवान्नृप ॥ घंटास्वनेनतंनादमं
बिकाचोपबृंहयत् ॥९॥ धनुर्ज्यासिंहघंटानांनादा
पूरितदिङ्मुखा ॥ निनादैर्भीषणैःकालीजिग्येवि
स्तारितानना ॥१०॥ तंनिनादमुपश्रुत्यदैत्यसैन्यै
श्चतुर्दिशं ॥ देवीसिंहस्तथाकालीसरोषैःपरिवा

रिताः ॥११॥ एतस्मिन्नंतरेभूपविनाशायसुरद्विषां ॥
भवायामरसिंहानामतिवीर्यबलान्विताः ॥१२॥ ब्र
ह्मेशगुहविष्णूनांतथेंद्रस्यचशक्तयः ॥ शरीरेभ्यो
विनिष्क्रम्यतद्रूपैश्चंडिकांययुः ॥१३॥ यस्यदेवस्य
यद्रूपं [illegible] वाहनं ॥ तद्वदेवहि [illegible]

म·त्रा·
११५

[illegible] ॥१३॥ यस्यदेवस्ययद्रूपंयथा-
भूषणवाहनं ॥ तद्वदेवहितच्छक्तिरसुरान्योद्धुमा
ययौ ॥१४॥ हंसयुक्तविमानाग्रेसाक्षसूत्रकमंडलुः
आयाताब्रह्मणःशक्तिर्ब्रह्माणीसाभिधीयते ॥१५॥
माहेश्वरीवृषारूढात्रिशूलवरधारिणी ॥ महा-

११५

हिवलयाप्राप्ताचंद्ररेखाविभूषणा ॥१६॥ कौमारीश
क्तिहस्ताचमयूरवरवाहना ॥ योद्धुमभ्याययौदैत्यां
नंबिकागुहरूपिणी ॥१७॥ तथैववैष्णवीशक्तिर्ग
रुडोपरिसंस्थिता ॥ शंखचक्रगदाशार्ङ्गखड्गहस्ता
भ्युपाययौ ॥१८॥ यज्ञवाराहमतुलंरूपंयाबिभ्रतो

सश०
११६

हरेः॥ शक्तिः साप्याययौ तत्र वाराही बिभ्रती तनुं
॥१९॥ नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः॥
प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः॥२०॥ वज्र
हस्ता तथैवैंद्री गजराजोपरि स्थिता॥ प्राप्ता सह
स्रनयना यथा शक्रस्तथैव सा॥२१॥ ततः परि

११६

वृतस्ताभिरीशानो देवशक्तिभिः॥ हन्यंतामसु
राः शीघ्र मम प्रीत्याह चंडिकां॥२२॥ ततो देवीश
रीरात्तु विनिष्क्रांतातिभीषणा॥ चंडिकाशक्ति
रत्युग्रा शिवाशतनिनादिनी॥२३॥ सा चाह धूम्रज
टिलमीशानमपराजिता॥ दूत त्वं गच्छ भगवन्

स.स.
११७

पार्श्वशुंभंनिशुंभंतयोः ॥२४॥ ब्रूहिशुंभंनिशुंभंच
दानवावतिगर्वितौ ॥ येचान्येदानवास्तत्रयुद्धाय
समुपस्थिताः ॥२५॥ त्रैलोक्यमिंद्रोलभतांदेवाःसं
तुहविर्भुजः ॥ यूयंप्रयातपातालंयदिजीवितुमि
च्छथ ॥२६॥ बलावलेपादथचेद्भवंतोयुद्धकांक्षिणः

११७

॥तदागच्छततृप्यंतुमच्छिवाःपिशितेनवः ॥२७॥
यतोनियुक्तोदौत्येनतयादेव्याशिवःस्वयं ॥ शिव
दूतीतिलोकेस्मिंततःसाख्यातिमागता ॥२८॥ ते
पिश्रुत्वावचोदेव्याःशर्वाख्यातंमहासुराः ॥ अ
मर्षापूरिता जग्मुर्यतःकात्यायनीस्थिता ॥२९॥

स.स:
११७

ततःप्रथममेवाग्रेशरशक्त्यृष्टिवृष्टिभिः॥ववर्
षुरुद्धतामर्षास्तांदेवीममरारयः॥३०॥साचतान्
प्रहितान्बाणान्छूलशक्तिपरश्वधान्॥चिच्छे
दलीलयाध्मातधनुर्मुक्तैर्महेषुभिः॥३१॥तस्या
ग्रतस्तथाकालीशूलपातविदारितान्॥खट्वांग

११८

पोथितांश्चारीन्कुर्वतीव्यचरत्तदा॥३२॥कमं
डलुजलाक्षेपहतवीर्यान्हतौजसः॥ब्रह्माणीचा
करोच्छत्रून्येनयेनस्मधावति॥३३॥माहेश्वरी
त्रिशूलेनतथाचक्रेणवैष्णवी॥दैत्याञ्जघान
कौमारीतथाशक्त्यातिकोपना॥३४॥ऐंद्रीकुलि

म.म.
११९

क्रपातेनशतशोदैत्यदानवाः पेतुर्विदारि
ताः पृथ्व्यांरुधिरौघप्रवर्षिणः ॥३५॥ तुंडप्रहार
विध्वस्तादंष्ट्राग्रक्षतवक्षसः वाराहमूर्त्यान्यप
तंश्चक्रेणचविदारिताः ॥३६॥ नखैर्विदारितां
श्चान्यान्भक्षयंतीमहासुरान् नारसिंहीचचा

११९

वाराजौनादापूर्णदिगंतरा ॥३७॥ चंडाट्टहासै
रसुराः शिवदूत्यभिदूषिताः पेतुःपृथिव्यांप
तितांस्तांश्चखादाथसातदा ॥३८॥ इतिमातृगणं
क्रुद्धंमर्दयंतंमहासुरान् दृष्ट्वाभ्युपायैर्विविधै
र्नेशुर्देवारिसैनिकाः ॥३९॥ पलायनपरान्दृ

सस०
१२०

ष्ट्वा दैत्यान्नृमातृगणार्दितान् ॥ योद्धुमभ्याययौ
क्रुद्धो रक्तबीजो महासुरः ॥४०॥ रक्तबिंदुर्यदा
भूमौ पतत्यस्य शरीरतः ॥ समुत्पतति मेदि
न्यां तत्प्रमाणस्तदासुरः ॥४१॥ युयुधे स गदापा
णिरिंद्रशक्त्या महासुरः ॥ ततश्चैंद्री स्ववज्रें

णा रक्तबीजमताडयत् ॥४२॥ कुलिशेनाह
तस्याशु तस्य सुस्राव शोणितं ॥ समुत्तस्थुस्त
तो योधास्तद्रूपास्तत्पराक्रमाः ॥४३॥ यावंतः
पतितास्तस्य शरीराद्रक्तबिंदवः ॥ तावंतः
पुरुषा जातास्तद्वीर्यबलविक्रमाः ॥४४॥ तेचा

सप्त. १२१

पियुयुधुस्तत्र पुरुषा रक्तसंभवाः ।। समं मातृ
भिरत्युग्रशस्त्रपातातिभीषणं ।। ४५ ।। पुनश्च व
ज्रपातेन क्षतमस्य शिरो यदा ।। ववाह रक्तं पु
रुषास्ततो जाताः सहस्रशः ।। ४६ ।। वैष्णवी सम
रे चैनं चक्रेणाभिजघान ह ।। गदया ताडयामा

१२१

स ऐन्द्री तमसुरेश्वरं ।। ४७ ।। वैष्णवीचक्रभिन्नस्य
रुधिरस्रावसंभवैः ।। सहस्रशो जगद्व्याप्तं तत्
स्वमाणैर्महासुरैः ।। ४८ ।। शक्त्या जघान कौमारी
वाराही च तथासिना ।। माहेश्वरी त्रिशूलेन र
बीजं क्तं महासुरं ।। ४९ ।। स चापि गदया दैत्यः सर्वा ए

वाहनतष्टयक॥ मातृकोपसमाविष्टो रक्त
बीजोमहासुरः॥५०॥ तस्याहतस्यबहुधाशक्ति
शूलादिभिर्भुवि॥ पपातयोवैरक्तौघस्तेनासं
छतशोसुराः॥५०॥ तैश्चासुरासृक्संभूतैरसुरैः
सकलंजगत॥ व्याप्तमासीत्ततोदेवाभयमाज

ग्मुरुत्तमं॥५२॥ तान्विषण्णान्सुरान्दृष्ट्वाचंडि
काप्राहसत्वरा॥ उवाचकालींचामुंडेविस्तरंवद
नंकुरु॥५३॥ मच्छस्त्रपातसंभूतान् रक्तबिंदून्महा
हासुरान्॥ रक्तबिंदोः॥प्र॥ तैच्छतंवक्त्रेणानेनवे
गिना॥५४॥ भक्षयंतीचररचरणेतदुत्पन्नान्महा

सप्त०
१२३

सुरान्॥एवमेषक्षयंदैत्यःक्षीणरक्तोगमिष्य
ति॥५५॥भक्ष्यमाणास्त्वयाचोग्रानचोत्पत्स्यंति
चापरे॥इत्युक्त्वातांततोदेवीशूलेनाभिजघान
तं॥५६॥मुखेनकालीजगृहेरक्तबीजस्यशोणितं
ततोसावाजघानाथगदयातत्रचंडिकां॥५७॥न

१२३

चास्यावेदनांचक्रेगदापातोल्पिकामपि॥तस्या
हतस्यादेहात्तुबहुसुस्रावशोणितं॥५८॥य
तस्ततस्तद्वक्त्रेणचामुंडासंप्रतीछति॥मुखेस
मुद्गतायेस्यारक्तपातान्महासुराः॥५९॥तांश्च
खादाथचामुंडापपौतस्यचशोणितं॥देवीशूले

नवज्रेणबाणैरसिभिर्ऋष्टिभिः॥६१॥जघान
रक्तबीजंतंचामुंडापीतशोणितं॥सपपातम
हीपृष्ठेशस्त्रसंघसमाहतः॥६२॥नीरक्तश्चमही
पालरक्तबीजोमहासुरः॥ततस्तेहर्षमतुलम
वापुस्त्रिदशानृप॥६३॥तेषांमातृगणोजातोनन



१२५
स.स.
१२६

र्वास्तुष्टमदोषतः ॥६३॥ ६३॥॥ इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये रक्तबीजवधो नामाष्टमोध्यायः॥८॥ ॥ ॥ उवाच १ अर्ध १ श्लोक ६१ एवं ६३ एवमंत्र॥५०२॥ ७ राजोवाच॥ विचित्रमिदमाख्यातं भगवन्भवतामम॥

१२५
१२६

देव्याश्चरितमहात्म्यं रक्तबीजवधाश्रितं॥१ भूयश्चेछाम्यहं श्रोतुं रक्तबीजे निपातिते॥ चकार १ शुंभो यत्कर्म निशुंभश्चातिकोपनः॥२ ॥ऋषिरु॥ ४ चकार कोपमतुलं रक्तबीजे निपातिते॥ शुंभासुरो निशुंभश्च हतेष्वन्येषु चाहवे ५ ॥ ६१

न्यमानंमहासैन्यंविलोक्यामर्षमुद्वहन्॥अ
भ्यधावन्निशुंभोथमुख्ययासुरसेनया॥६॥त
स्याग्रतस्तथापृष्ठेपार्श्वयोश्चमहासुराः॥संदष्टौ
ष्ठपुटाःक्रुद्धाहंतुंदेवीमुपाययुः॥७॥आजगा
ममहावीर्यःशुंभोपिस्वबलैर्वृतः॥निहंतुंचंडि

कांकोपात्कृत्वायुद्धंतुमातृभिः॥८॥ततोयुद्धम
तीवासीद्देव्याःशुंभनिशुंभयोः॥शरवर्षमती
वोग्रंमेघयोरिववर्षतोः॥९॥चिच्छेदास्तांछरां
स्ताभ्यांचंडिकास्वशरोत्करैः॥ताडयामासचांगे
ष्वस्त्रौघैरसुरेश्वरौ॥१०॥निशुंभोनिशितंख

ङ्गं चर्मचादाय सुप्रभं ॥ ताडयन्मूर्ध्नि सिंहं दे
व्यावाहनमुत्तमं ॥११॥ ताडितेवाहने देवी क्षु
रप्रेणासिमुत्तमं ॥ निशुंभस्याशु चिछेद चर्म
चाप्यष्टचंद्रकं ॥१२॥ छिन्नेचर्मणि खड्गे च श
क्तिं चिक्षेप सो सुरः ॥ तामप्यस्य द्विधा चक्रे च

क्रेणाभिमुखागतां ॥१३॥ कोपाध्मातो निशुंभोथ
शूलं जग्राह दानवः ॥ आयांतं मुष्टिपातेन दे
वी तच्चाप्यचूर्णयत् ॥१४॥ आविध्याथ गदां सो
पि चिक्षेप चंडिकां प्रति ॥ सापि देव्या त्रिशूलेन
भिन्ना भस्मत्वमागता ॥१५॥ ततः परशुहस्तं

सप्त.
१२८

तमायांतं दैत्यपुंगवं ॥ आहत्य देवी बाणौघैरपा-
तयत भूतले ॥१६॥ तस्मिन्निपतिते भूमौ निशुं-
भे भीमविक्रमे ॥ भ्रातर्यतीव संक्रुद्धः प्रययौ हंतु-
मंबिकां ॥१७॥ स रथस्थस्तथात्युच्चैर्गृहीतपरमा-
युधैः ॥ भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभः

१२८

॥१८॥ तमायांतं समालोक्य देवी शंखमवादयत् ॥
ज्याशब्दं चापि धनुषश्चकारातीव दुःसहं ॥१९॥
पूरयामास ककुभो निजघंटास्वनेन च ॥ समस्त-
दैत्यसैन्यानां तेजोवधविधायिना ॥२०॥ ततः सिंहो
महानादैस्त्याजितेभमहामदैः ॥ पूरयामास गग

सस:

नंगांतयोपदिष्टोदश ॥२१॥ ततः कालीसमुत्प
त्यगगनंक्ष्मामताडयत् ॥ कराभ्यांतन्निनादे
नप्राक्स्वनास्तेतिरोहिताः ॥२२॥ अट्टट्टहास
मशिवंशिवदूतीचकारह ॥ तैः शब्दैरसुरास्त्रे
सुः शुंभकोपंपरंययौ ॥२३॥ दुरात्मंस्तिष्ठतिष्ठे

१२७

ना भी

तिव्याजहाराम्बिका ॥ तदाजयेत्यभिहितंदेवैः रा
काशसंस्थितैः ॥२४॥ शुंभेनागत्ययाशक्तिर्मुक्ता
ज्वालातिभीषणा ॥ आयांतिवह्निकूटाभासानिर
स्तामहोल्कया ॥२५॥ सिंहनादेनशुंभस्यव्याप्तंलो
कत्रयांतरं ॥ निर्घातनिस्वनोघोरोजितवानवनि

पते ॥२६॥ शुंभमुक्तान्छरान्देवी शुंभस्तत्प्रहितां
छरान् ॥ चिच्छेद स्वशरैरुग्रैः शतशोथ सहस्रशः
॥२७॥ ततः सा चंडिका क्रुद्धा शूलेनाभिजघान तं
स तदाभिहतो भूमौ मूर्छितो निपपात ह ॥२८॥ त
तो निशुंभः संप्राप्य चेतनामात्तकार्मुकः ॥ आज॰

यान शरैर्देवीं कालिं केसरिणं तथा ॥२९॥ पुनर
श्च कृत्वा बाहूनामयुतं दनुजेश्वरः ॥ चक्रायुधे
न दितिजश्छादयामास चंडिकां ॥३०॥ ततो भग
वती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी ॥ चिच्छेद तानि
चक्राणि स्वशरैः सायकांश्च तान् ॥३१॥ ततो नि॰

मम·
१३१

ष्मुंभो वेगेन गदामादाय चंडिका ॥ अभ्यधावत वै
हंतुं दैत्यसेनासमावृतः ॥ ३२ तस्यापतत एवाशु
गदांचिच्छेद चंडिका ॥ खड्गेन सितधारेण स च शू
लं समाददे ॥ ३३ ॥ शूलहस्तं समायांतं निशुंभम
मरार्द्दनं ॥ हृदि विव्याध शूलेन वेगाविद्धेन चंडि

१३१

का ॥ ३४ ॥ भिन्नस्य तस्य शूलेन हृदयान्निःसृतोप
रः ॥ महाबलो महावीर्यस्तिष्टेति पुरुषो वदन् ॥ ३५
तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः ॥ शिरश्चि
च्छेद खड्गेन ततो सावपतद्भुवि ॥ ३६ ततः सिंहश्च
खादोग्रदंष्ट्राक्षुण्णशिरोधरान् ॥ असुरांस्तांस्तथा

सप्त॰ १३२

कालीशिवदूतीतथापरान् ॥३७॥ कौमारीश

क्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ॥ ब्रह्माणीम

त्रपूतेनतोयेनान्येनिराकृताः ॥३८॥ माहेश्वरी

त्रिशूलेनभिन्नाःपेतुस्तथापरे ॥ वाराहीतुंडघ

ातेनकेचिच्चूर्णीकृताभुवि ॥३९॥ खंडखंडं

१३२

चचक्रेणवैष्णव्यादानवाःकृताः ॥ वज्रेणचैं

द्रीहस्ताग्रविमुक्तेनतथापरे ॥४०॥ केचिद्वि

नेशुरसुराःकेचिन्नष्टामहाहवात् ॥ भक्षिता

श्चापरेकालीशिवदूतीमृगाधिपैः ॥४१॥ ॥६॥

इतिमार्कंडेयपुराणेसावर्णि [illegible] न्वंतरेदेवीमा



माहात्म्येनिशुंभवधोनामदशमोध्यायः ॥१०॥ ॥
उवाच २ अर्द्ध श्लोक ३९ एवमंत्र ५५२ ॥ ॥
ऋषिरुवाच ॥ ॥१॥ निशुंभंनिहतंदृष्ट्वाभ्रातरंप्रा
णसंमितं ॥ हन्यमानंबलंचैव शुंभःक्रुद्धोब्रवी
द्वचः २ बलावलेपदुष्टेत्वंमादुर्गेगर्वमावह ॥

सप्त.
१३४

स्त्वन्यासां बलमाश्रित्य युध्यसे यातिमानिनी ॥३॥ दे
व्युवाच ॥४॥ एकैवाहं जगत्यत्र द्वितीया का ममा
परा ॥ पश्यैता दुष्ट मय्येव विशंत्यो मद्विभूतयः ॥
५॥ ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयं
तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदांबिका ॥६॥

१३४

देव्युवाच ॥७॥ अहं विभूत्या बहुभिरिह रूपैर्य
दास्थिता ॥ तत्संहृतं मयैकैव तिष्ठाम्यादौ स्थिरो
भव ॥८॥ ऋषिरुवाच ॥९॥ ततः प्रववृते युद्धं
देव्याः शुंभस्य चोभयोः ॥ पश्यतां सर्वदेवानां अ
सुराणां च दारुणं ॥१०॥ शरवर्षैः शितैः शस्त्रै

स.त.

१३५

स्तथास्त्रैश्चैव दारुणैः ॥ तयोर्युद्धमभूद्भूयः सर्वलोकभयंकरं ॥ ११ ॥ दिव्यान्यस्त्राणि शतशो मुमुचेयान्यथांबिका ॥ बभंज तानि दैत्येंद्रस्तत्प्रतीघातकर्तृभिः ॥ १२ ॥ मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी ॥ बभंज लीलयैवोग्रहुंकारोच्चारणादि

१३५

भिः ॥ १३ ॥ ततः शरशतैर्देवीमाछादयत सोसुरः ॥ सापि तत्कुपिता देवी धनुश्चिछेद चेषुभिः ॥ १४ ॥ छिन्ने धनुषि दैत्येंद्रस्तथा शक्तिमथाददे ॥ चिछेद देवी चक्रेण तामप्यस्य करे स्थितां ॥ १५ ॥ ततः खड्गमुपादाय शतचंद्रं च भानुमत ॥ अभ्यधावत

सं.त.
१३६

तोदेवीदैत्यानामधिपेश्वरः॥२६॥तस्यापततए
वाशुखड्गंचिछेदचंडिका॥धनुर्मुक्तैःशितैर्बा
णैश्चर्मचार्ककरामलं॥२७॥हताश्वसतदादैत्य
श्छिन्नधन्वाविसारथिः॥जग्राहमुद्गरंघोरमंबि
कानिधनोद्यतः॥२८॥चिछेदापततस्तस्यमुद्गरं

१३६

निशितैःशरैः॥तथापिसोऽभ्यधावत्तांमुष्टिमु
द्यम्यवेगवान्॥२९॥समुष्टिंपातयामासहृदये
दैत्यपुंगवः॥देव्यास्तंचापिसादेवीतलेनोरस्य
ताडयत्॥३०॥तलप्रहाराभिहतोनिपपातमही
तले॥सदैत्यराजःसहसापुनरेवतथोत्थितः॥

॥२१॥ उत्पत्यचप्रगृह्योच्चैर्देवींगगनमाश्रितः॥
तत्रापिसानिराधारायुयुधेतेनचंडिका॥२२॥नि
युद्धंखेतदादैत्यश्चंडिकाचपरस्परं॥चक्रतुः
प्रथमंसिद्धमुनिविस्मयकारकं॥२३॥ततोनियु
द्धंसुचिरंकृत्वातेनांबिकासह॥उत्पात्यभ्रामया।

मासचिक्षेपधरणीतले॥२४॥संक्षिप्तोधरणींप्रा
प्यमुष्टिमुद्यम्यवेगितः॥अभ्यधावतदुष्टात्मा।
चंडिकानिधनेच्छया॥२५॥तमायांतंततोदेवीस।
र्वदैत्यजनेश्वरं॥जगत्यांपातयामासभित्वाशूले
नवक्षसि॥२६॥सगतासुःपपातोर्व्यांदेवीशूला।

म·मा·
१३८

ग्नविघ्नतः ।। चालयन्सकलां पृथ्वीं साब्धिद्वीपां स
पर्वतां ।। २७ ।। ततः प्रसन्नमखिलं हते तस्मिन्दुरा
त्मनि ।। जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्न
भः ।। २८ ।। उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं य
युः ।। सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते ।।

१३८

म·मा·
१३९



१३९

॥२९॥ ततो देवगणाः सर्वे हर्षनिर्भरमानसाः ।
बभूवुर्निहते तस्मिन्गंधर्वा ललितं जगुः ॥३०॥
अवादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः ॥ ववुः
पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः ॥३१॥ जज्व
लुश्चाग्नयः शांताः शांता दिग्जनितः स्वनाः ॥३२॥

॥इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवी
माहात्म्ये शुंभवधो नाम दशमोऽध्यायः ॥१०॥
॥ ॥उवाच ४ अर्ध १ श्लोक २७ ॥ एवं ३२ एवमं
त्रः ॥५७५॥ ऋषिरुवाच ॥ ॥१॥ देव्या हते तत्र महासु
रेंद्रे सेंद्राः सुरा वह्निपुरोगमास्तां । कात्यायिनीं तु

मम
१४०

ष्टुवुरिष्टलाभाद्विकाशिवक्त्रास्तुविकाशिताशाः ॥
२ देवीप्रपन्नार्त्तिहरेप्रसीदप्रसीदमातर्ज्जगतोखि
लस्य ॥ प्रसीदविश्वेश्वरिपाहिविश्वंत्वमीश्वरीदे
विचराचरस्य ॥ ३ ॥ आधारभूताजगतस्त्वमेकामही
स्वरूपेणयतःस्थितासि ॥ अपांस्वरूपस्थितयात्व

१४०

यैवदाप्यायतेकृत्स्नमलंघ्यवीर्ये ॥ ४ ॥ त्वंवैस्नवी
शक्तिरनंतवीर्याविश्वस्यबीजंपरमासिमाया ॥
संमोहितंदेविसमस्तमेतत्वंवैप्रसन्नाभुविमु
क्तिहेतुः ॥ ५ ॥ विद्याःसमस्तास्तवदेविभेदाःस्त्रियः
समस्ताःसकलाजगत्सु ॥ त्वयैकयापूरितमंबयैत

स०स० क्ताते स्तुतिः स्तव्यपरापरोक्तिः ॥६॥ सर्वभूता य
२४॥ दा देवी स्वर्गमुक्तिप्रदायिनी ॥ त्वं स्तुता स्तुतये का
वा न वं तु परमोक्तयः ॥७॥ सर्वस्य बुद्धिरूपेण जन
स्य हृदि संस्थिते स्वर्गापवर्गदे देवी नारायणि न
मोस्तुते ॥८॥ कलाकाष्ठादिरूपेण परिणामप्रदा २४॥

यिनी ॥ विश्वस्योपरतौ शक्ते नारायणि नमोस्तुते
॥९॥ सर्वमंगलमांगल्ये शिवे सर्वार्थसाधके ॥ शा
रण्ये त्र्यंबके गौरी नारायणि नमोस्तुते ॥१०॥ सृष्टि
स्थिति विनाशानां शक्तिभूते सनातनि ॥ गुणाश्र
ये गुणमये नारायणि नमोस्तुते ॥११॥ शरणाग

सप्त०
१४२

तदीनार्त्तपरित्राणपरायणे सर्वस्यार्त्तिहरे देवि
नारायणि नमोस्तु ते ॥१२॥ हंसयुक्तविमानस्थे ब्रह्मा
णि रूपधारिणि कौशांभःक्षरिके देवि नारायणि
नमोस्तु ते ॥१३॥ त्रिशूलचंद्राहिधरे महावृषभवाहि
नि माहेश्वरीस्वरूपेण नारायणि नमोस्तु ते ॥१४॥

१४२

मयूरकुक्कुटवृते महाशक्तिधरेनघे कौमारीरू
पसंस्थाने नारायणि नमोस्तु ते ॥१५॥ शंखचक्र
गदाशार्ङ्गगृहीतपरमायुधे प्रसीद वैष्णवीरू
पे नारायणि नमोस्तु ते ॥१५॥

म.स.प
१४३

णि नमोस्तु ते ॥ १६ ॥ गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतव
सुंधरे ॥ वराहरूपिणि शिवे नारायणि नमोस्तु ते ॥
१७ ॥ नृसिंहरूपेणोग्रेण हंतु दैत्यान्कृतोद्यमे ॥ त्रै
त्रैलोक्यत्राणसहिते नारायणि नमोस्तु ते ॥ १८ ॥
किरीटिनि महावज्रे सहस्रनयनोज्वले ॥ वृत्रप्रा

१४३

णहरे चैंद्री नारायणि नमोस्तु ते ॥ १९ ॥ शिवदूती
स्वरूपेण हतदैत्यमहाबले ॥ घोररूपे महारावे
नारायणि नमोस्तु ते ॥ २० ॥ दंष्ट्राकरालवदने शि
रोमालाविभूषणे ॥ चामुंडे मुंडमथने नारायणि
नमोस्तु ते ॥ २१ ॥ लक्ष्मी लज्जे महाविद्ये श्रद्धे पुष्टि स्व

सप्त॰
१४४

धेध्रुवे ॥ महारात्रिमहाविद्येनारायणिनमोस्तु
ते ॥२२॥ मेधेसरस्वतिवरेभूतिबाभ्रवितामसी ॥
नियतेत्वंप्रसीदेशेनारायणिनमोस्तुते ॥२३॥ सर्व
स्वरूपेसर्वेशेसर्वशक्तिसमन्विते ॥ भयेभ्यस्त्राहि
नोदेविदुर्गेदेविनमोस्तुते ॥२४॥ एतत्तेवदनंसौ

१४४

म्यंलोचनत्रयभूषितं ॥ पातुनःसर्वभूतेभ्यःका
त्यायनिनमोस्तुते ॥२५॥ ज्वालाकरालमत्युग्रम
शेषासुरसूदनं ॥ त्रिशूलंपातुनोभीतेर्भद्रका
लिनमोस्तुते ॥२६॥ हिनस्तिदैत्यतेजांसिस्वनेना
पूर्ययाजगत् ॥ साघंटापातुनोदेविपापेभ्योनःसु

तानिव ॥२७॥ असुरासृग्वसापंकचर्चितस्तेक-
रोज्ज्वलः ॥ शुभायखड्गोभवतु चंडिके त्वांनतावयं
॥२८॥ रोगानशेषानपहंसितुष्टा रुष्टातुकामान्स-
कलानभीष्टान् ॥ त्वामाश्रितानांनविपन्नराणांत्वा
माश्रिताह्याश्रयतांप्रयांति ॥२९॥ एतत्कृतंयत्कद-

नंत्वयाद्यधर्मद्विषांदेविमहासुराणां ॥ रूपैरने
कैर्बहुधात्ममूर्तिं कृत्वांबिके तत्प्रकरोतिकान्या
॥३०॥ विद्यासुशास्त्रेषु विवेकदीपेष्वाद्येषुवाक्ये-
षु च कात्वदन्या ॥ ममत्वगर्तेतिमहांधकारे विभ्रा-
मयत्येतदतीवविश्वं ॥३१॥ रक्षांसियत्रोग्रविषा-

म॰श॰
१४६

श्चनागायत्रारयोदस्युबलानियत्र दावानलोय
त्र तथाब्धिमध्ये तत्रास्थिता त्वं परिपासि विश्वं ॥३२
विश्वेश्व रि त्वं परिपासि विश्वं विश्वात्मिका धारयसी
ति विश्वं ॥ विश्वेशवंद्या भवती भवंति विश्वाश्रया ये
त्वयि भक्तिनम्राः ॥३३ देवि प्रसीद परिपालय नो रि

१४६

भीतेर्नित्यं यथासुरवधादधुनैव सद्यः ॥ पापानि
सर्वजगतां प्रशमं नयाशु उत्पातपाकजनितांश्च म
होपसर्गान् ॥३४ देव्युवाच ॥ ॥ ॥३५ वरदाहं
सुरगणा वरं यं मनसेच्छथ ॥ तं वृणुध्वं प्रयच्छामि
जगतामुपकारकं ॥३६ देवा ऊचुः ॥ ॥ ॥३७ सर्वा
प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि ॥ त्रैलोक्यवा

बाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि। एवमेत्व
त्वयाकार्यमस्मद्वैरिविनाशनं ॥३९॥ देव्युवाच॥
॥४०॥ वैवस्वतेंतरे प्राप्ते अष्टाविंशतिमे युगे ॥ शुं
भो निशुंभश्चैवान्यावुत्पत्स्येते महासुरौ ॥४१॥ नंद
गोपकुले जाता यशोदागर्भसंभवा ॥ ततस्तौ नाश।

यिष्यामि विंध्याचलनिवासिनी ॥४२॥ पुनरप्यतिरौ
द्रेण रूपेण पृथिवीपते ॥ अवतीर्य हनिष्यामि वै
प्रचित्तांस्तु दानवान् ॥४३॥ भक्षयंत्याश्च तानुग्रान्।
वैप्रचित्तान्महासुरान् ॥ रक्ता दंता भविष्यंति दाडि
मीकुसुमोपमाः ॥४४॥ ततो मां देवताः स्वर्गे मर्त्यलो

मस॰
१४८

केचमानवाः॥ स्तुवंतोव्याहरिष्यंतिसततंरक्त
दंतिकां॥४५॥ भूयश्चशतवार्षिक्यामनावृष्ट्यामनं
भसि॥ मुनिभिः संस्तुताभूमौसंभविष्याम्ययोनिजा
॥४६॥ ततः शतेननेत्राणांनिरीक्षिष्यामियन्मुनीन्
कीर्तयिष्यंतिमनुजाः शताक्षीमितिमांततः॥४७

१४८

ततोऽहमखिलंलोकमात्मदेहसमुद्भवैः॥ भरि
ष्यामिसुराः शाकैरावृष्टेः प्राणधारकैः॥४८॥ शा
कंभरीतिविख्यातिंतदायास्याम्यहंभुवि॥ तत्रैव
चवधिष्यामिदुर्गमाख्यंमहासुरं॥४९॥ दुर्गादे
वीतिविख्यातंतन्मेनामभविष्यति॥ पुनश्चाहंय

स.स.
१४९

दाभीमं रूपं कृत्वा हिमाचले ॥५०॥ रक्षांसि भक्षयि-
ष्यामि मुनीनां त्राणकारणात् ॥ तदा मां मुनयः
सर्वे स्तोष्यंत्यानम्रमूर्त्तयः ॥५१॥ भीमा देवीति वि-
ख्यातं तन्मे नाम भविष्यति ॥ यदारुणाख्यस्त्रैलोक्ये
महाबाधां करिष्यति ॥५२॥ तदाहं भ्रामरं रूपं कृ-

१४९

त्वासंख्येयषट्पदं ॥ त्रैलोक्यस्य हितार्थाय वधि-
ष्यामि महासुरं ॥५३॥ भ्रामरीति च मां लोकास्तदा
स्तोष्यंति सर्वतः ॥ इत्थं यदा यदा बाधा दानवोत्था भ-
विष्यति ॥५४॥ तदा तदावतीर्याहं करिष्याम्यरिसं-
क्षयं ॥५५॥ इति मार्कंडेयपुराणे सावर्णिके मन्वं-



स.स० १५१

धुकैटभनाशंचमहिषासुरघातनं ॥ कीर्त्तयिष्यंति
येतद्वद्वधंशुंभनिशुंभयोः ॥३॥ अष्टम्यांचचतुर्द
श्यांनवम्यांचैकचेतसः ॥ श्रोष्यंतिचैवयेभक्त्या
मममाहात्म्यमुत्तमं ॥४॥ नतेषांदुष्कृतंकिंचिद्
दुष्कृतोत्थानचापदः ॥ भविष्यतिनदारिद्र्यंनचै

१५१

तरे देवीमाहात्म्ये नारायणीस्तुतिर्नामैकादशो
ध्यायः ॥ ॥११॥ श्री ॥ ॥ उवाच ॥ ध्याय
६ ॥ श्लोक ५० ॥ एवं ५५ ॥ एवं मंत्रः ५३० ॥ देव्युवाच
॥ ॥ एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः ॥ ॥
तस्याहं सकलां बाधां नाशयिष्याम्यसंशयं ॥ १ ॥ म

म

वेष्टविप्रयोजनं ॥ ५ ॥ शत्रुतो न भयं तस्य दस्युतो वा न
राजतः ॥ न शस्त्रानलतोयौघात्कदाचित्संभविः
ष्यति ॥ ६ ॥ तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहि
तैः ॥ श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं महत् ॥
७ ॥ उपसर्गानशेषांस्तु महामारीसमुद्भवान् ॥ ८

म॰म॰
१५२

तथात्रिविधमुत्पातंमाहात्म्यंशमयेन्मम ॥८॥
यत्रैतत्पठ्यतेसम्यङ्नित्यमायतनेमम ॥ सदान
तद्विमोक्ष्यामिसान्निध्यंतत्रमेस्थितं ॥९॥ बलि
प्रदानेपूजायामग्निकार्येमहोत्सवे ॥ सर्वंममैतच्च
रितमुच्चार्यंश्राव्यमेवच ॥१०॥ जानताजानतावापि

१५२

म॰स॰
१५३

त्रायः ॥१२॥ श्रुत्वाममैतन्माहात्म्यंतथाचोत्पत्तयःशु
भाः ॥ पराक्रमंचयुद्धेषुजायतेनिर्भयःपुमान्
॥१४॥ रिपवःसंक्षयंयांतिकल्याणंचोपपद्यते ॥ नं
दतेचकुलंपुंसांमाहात्म्यंममशृण्वतां ॥१५॥ शांति
कर्मणिसर्वत्रतथादुःस्वप्नदर्शने ॥ ग्रहपीडासु

१५३

बलिप्रज्ञांतथाकृतां॥प्रीतिच्छिष्याम्यहंप्रीत्याव
न्हिहोमंतथाकृतं॥११॥शरत्कालेमहापूजाक्रिय
तेयाचवार्षिकी॥तस्यान्ममैतन्माहात्म्यंश्रुत्वाभ
क्तिसमन्वितः॥१२॥सर्वाबाधाविनिर्मुक्तोधनधा
न्यसुतान्वितः।मनुष्योमत्प्रसादेनभविष्यतिनसं

चोग्रासुमाहात्म्यंश्रुणुयान्मम॥१६॥उपसर्गाःश
मंयांतिग्रहपीडाश्चदारुणाः॥दुःस्वप्नंचनृभिर्दृ
ष्टंसुस्वप्नमुपजायते॥१७॥बालग्रहाभिभूतानां
बालानांशांतिकारकं॥संघातभेदेचनृणांमैत्रीक
रणमुत्तमं॥१८॥दुर्वृत्तानामशेषाणांबलहानिक

स त० रंपरं॥ रक्षोभूतपिशाचानांपठनादेवनाशनं॥
१५४ १९॥ सर्वंममैतन्माहात्म्यंममसन्निधिकारकं॥
पशुपुष्पार्घधूपैश्चगंधदीपैस्तथोत्तमैः॥२०॥ वि
प्राणांभोजनैर्होमैः प्रोक्षणीयैरहर्निशं॥ अन्यै
श्चविविधैर्भोगैः प्रदानैर्वत्सरेणया॥२१॥ प्रीतिर १५४

र्मेक्रियतेसास्मिन्सकृत्सुचरितेश्रुते॥ श्रुतं
हरतिपापानितथारोग्यंप्रयच्छति॥२२॥ रक्षां
करोतिभूतेभ्योजन्मनांकीर्तनंमम॥ युद्धेषुच
रितंयन्मेदुष्टदैत्यनिबर्हणं॥२३॥ तस्मिन्श्रु
तेवैरिकृतंभयंपुंसांनजायते॥ युष्माभिस्तुत

म.त०
१५५

योगाश्चयाश्चब्रह्मर्षिभिःकृताः॥२४॥ब्रह्मणा
चकृतास्तास्तुप्रयछंतिशुभामतिं॥अरण्येप्रां
तरेवापिदावाग्निपरिवारितः॥२५॥दस्युभिर्वा
वृतःशून्येग्रहीतोवापिशत्रुभिः॥सिंहव्याघ्रानु
यातोवावनेवावनहस्तिभिः॥२६॥राज्ञाक्रुद्धेनवा

१५५

ज्ञप्तोवध्योबंधगतोपिवा॥आघूर्णितोवावातेन
स्थितःपोतेमहार्णवे॥२७॥पतत्सुचापिशस्त्रेषु
संग्रामेभृशदारुणे॥सर्वाबाधासुघोरासुवेदना
भ्यर्दितोपिवा॥२८॥स्मरन्ममैतन्महात्म्यंनरोमु
च्येतसंकटान्॥ममप्रभावात्सिंहाद्यादस्यवोवैरि

स॰स॰
१५६

शिरास्तथा ॥२९॥ हता देवपलायंते स्मरतस्त्वा॰
शितं मम ॥३०॥ ऋषिरुवाच ॥ ॥३१॥ इत्युक्त्वा
सा भगवती चंडीका चंडविक्रमा ॥३२॥ पश्यता
मेव देवानां तत्रैवांतरधीयत ॥ तेपि देवा निराातं
काः स्वाधिकारान्यथा पुरा ॥३३॥ यज्ञभाग भुजः

१५६

सर्वे चक्रुर्विनिहतारयः ॥ दैत्याश्च देव्या निहते
शुंभे देवरिपौ युधि ॥३४॥ जगद्विध्वंसिके तस्मिन्
महोग्रेतुलविक्रमे ॥ निशुंभे च महावीर्ये शेषाः
पातालमाययुः ॥३५॥ एवं भगवती देवी सा नित्या
पि पुनः पुनः ॥ संभूय कुरुते भूप जगतः परिपा॰

नि २

लनं ॥ ३६ ॥ तयैतन्मोह्यते विश्वं सैव विश्वं प्रसूयते ॥ सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति ॥ ३७ ॥ व्याप्तं तयैतत्सकलं ब्रह्मांडं मनुजेश्वर ॥ महाकाल्या महाकाले महामारीस्वरूपया ॥ ३८ ॥ सैव काले महामारी सैव सृष्टिर्भवत्यजा ॥ स्थितिं

करोति भूतानां सैव काले सनातनी ॥ ३९ ॥ भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे ॥ सैवाभावे तथालक्ष्मीर्विनाशायोपजायते ॥ ४० ॥ स्तुता संपूजिता पुष्पैर्धूपगंधादिभिस्तथा ॥ ददाति वित्तं पुत्रांश्च मतिं धर्मे तथा शुभां ॥ ४१ ॥ इति मार्कं



डेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येदे-
आप्रभावकथनंदेवीवाक्यंनामद्वादशोध्यायः
उवाच।२अर्द्ध२।श्लोक३१।एवं४१।।एवमंत्रा६
७१।।ऋषिरुवाच।। ।।१।।एतत्तेकथितंभूपदेवी
माहात्म्यमुत्तमं एवंप्रभावासादेवीययेदंधार्य

स.श.
१५९

तेजगत् ॥ २ विघातश्चैव क्रियते त्वं गवद्दिसुमा
यया ॥ तयात्वमेष वैश्यश्च तथैवान्ये विवेकिनः ॥
३ मोह्यंते मोहिताश्चैव मोहमेष्यंति चापरे ॥ ता
मुपैहि महाराज शरणं परमेश्वरीं ॥ ४ ॥ आराधि
तासैव नृणां भोगस्वर्गापवर्गदा ॥ ५ ॥ मार्कंडेय उ

१५९

वाच ॥ ६ ॥ इति तस्य वचः श्रुत्वा सुरथः स नराधिपः
नः ॥ ७ ॥ प्रणिपत्य महाभागं तमृषिं संशितव्रतं ॥
निर्विण्णोतिममत्वेन राज्यापहरणेन च ॥ ८ ॥ ज
गाम सद्यस्तपसे स च वैश्यो महामुने ॥ संदर्शना
र्थमंबाया नदीपुलिनसंस्थितः ॥ ९ ॥ स च वैश्यस्त

स॰ स॰
१६०

स्तपस्तेपे देवीसूक्तं परंजपन् ॥ तौतस्मिन्पुलि
नेदेव्याः कृत्वा मूर्त्तिंमहीमयीं ॥ १० ॥ अर्हणांच
क्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः ॥ निराहारौय
ताहारौतन्मनस्कौसमाहितौ ॥ ११ ॥ ददतुस्तौब
लिंचैवनिजगात्रासृगुक्षितं ॥ एवंसमाराधयतो

१६०

त्रिभिर्वर्षैर्यतात्मनोः ॥ १२ ॥ परितुष्टाजगद्धात्री
प्रत्यक्षंप्राहचंडिका ॥ १३ ॥ देव्युवाच ॥ १४ ॥ यत्प्रा
र्थ्यतेत्वयाभूपत्वयाचकुलनंदन ॥ १५ ॥ मत्तस्त
त्प्राप्यतांसर्वंपरितुष्टाददामितत् ॥ १६ ॥ मार्कंडे
यउवाच ॥ ॥ १७ ॥ ततोवव्रेनृपोराज्यमविभ्रंशा

सप्त.
१६२

त्यजन्मनि ॥ १८ ॥ स्वैश्चैव च निजं राज्यं हतशत्रुबलं
बलात् ॥ सोपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः
॥ १९ ॥ ममेत्यहमिति प्राज्ञः संगविच्युतिकारकं ॥ २०
देव्युवाच ॥ ॥ २१ ॥ स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्य
तेभवान् ॥ २२ ॥ हत्वा रिपूनस्खलितं तव तत्र भविष्य

१६२

ति ॥ मृतश्च भूयः संप्राप्य जन्म देवाद्विवस्वतः ॥ २३ ॥
सावर्णिको नाम मनुर्भवान्भुवि भविष्यति ॥ वैश्य
वर्य त्वया यश्च वरोस्मत्तोभिवांछितः ॥ २४ ॥ तं प्रयच्छा
मि संसिद्ध्यै तव ज्ञानं भविष्यति ॥ २५ ॥ मार्कंडेय उ
वाच ॥ २६ ॥ इति दत्वा तयोर्देवी यथाभिलषितं वरं



॥ बभूवांतर्द्धितासद्योभक्त्याताभ्यामभिष्टुता ॥ ए
वंदेव्यावरंलब्धासुरथः क्षत्रियर्षभः ॥२८॥ सूर्या
ज्जन्मसमासाद्यसावर्णिर्भवितामनुः ॥२९॥ ॥ इ
तिमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवी
माहात्म्येगौडिपाठेसुरथवैश्ययोर्वरप्रदानो

म.स. १६२

नामत्रयोदशोध्यायः उवाच ६ अर्द्ध १२ एवं २९ एवमादिमंत्रः ७०० समस्तउवाच ५७ अर्द्ध ४२ श्लोक ५३५ ॥ अवदान २२ समस्तांकश्लोक ५७८ ॥ एवं मंत्र ७०० मालामंत्रसमस्ताक्षर २९९५३१ ॥ श्रुतंनवतु ॥ पुनः सप्तशतीमा

१६२

लामंत्रस्यअक्षरन्यासंकुर्यात् ॥ खड्गिनी शूलिनी घोरा० हृदयायनमः ॥ शूलेनपाहिनोदेवी० शिरसेस्वाहा ॥ प्राच्यांरक्षप्रतीच्यांच० शिखायैवषट् सौम्यानियानिरूपाणि० कवचायहुं ॥ खड्गशूलगदादीनि० नेत्रत्रयायवौषट् ॥ सर्वस्वरूपेस

न.म.
१६२

वेन्नो० अस्त्रायफट् । पुनःमूलमंत्रमष्टोत्तरशतं
प्रजप्य । मूलमंत्रस्यस्वउंगन्यासंकृत्वा । ऐंहृदया
यनमः । ह्रींशिरसेस्वाहा । क्लींशिखायैवषट् । चा
मुंडायैकवचायहुं । विच्चेनेत्रत्रयायवौषट् । ऐंह्रीं
क्लींचामुंडायैविच्चे० अस्त्रायफट् । मूलमंत्रेण

१६२

प्राणानायम्य । गुह्यातिगुह्यगोप्त्रीत्वंगृहाणास्मर
त्कृतंजपं । सिद्धिर्भवतुमेदेवित्वत्प्रसादान्महेश्व
री ॥ देव्यावामहस्तेजपंनिवेदयेत् । योनिमुद्र
याप्रणम्य ॥ इतिउत्तरन्यासमंत्रसमाप्तः ॥
॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री

सप्त।
।२८३।

॥समाप्तोयंसप्तशतीपाठः॥

१२

॥अस्यश्रीरहस्यत्रयनारायणऋषिः॥त्रिष्टु
ष्टुप्छंदः॥महाकालीमहालक्ष्मीमहासरस्व
ती देवताः॥यथोक्तफलावाप्त्यर्थेजपेविनियोगः
॥राजोवाच॥ ॥भवन्नवतारामेचंडिकायास्त्व
योदिताः॥एतेषांप्रकृतिंब्रह्मन्प्रधानंवक्तुमर्ह

स॰स॰
१६४

मि॥१॥ त्वाराध्यं यन्मया देव्याः स्वरूपं येन वै द्विज
ः विधिना ब्रूहि सकलं यथावत्तत्त्वेन तस्य मे ॥ श
रुधिनवाच॥ इदं रहस्यं परममनाख्येयं प्रच
क्षते॥ नक्तोसीति न मे किंचित्तवावाच्यं नराधिप
॥ सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी॥ ल ॥१॥

क्ष्यालक्ष्यस्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता॥
४॥ मातुलिंगं गदां खेटं पानपात्रं च बिभ्रती॥ ना
गं लिंगं च योनिं च बिभ्रति नृप मूर्द्धनि॥ ५॥ तप्त
कांचनवर्णाभा तप्तकांचनभूषणा॥ शून्यं तद
खिलं स्वेन पूरयामास तेजसा॥ ६॥ शून्यं तद

म.स.
१६५

खिलंस्वेनटृरयामासतेजसा॥६॥शून्यंतदखि
लंलोकविलोक्यपरमेश्वरी॥बभाररूपमपरं
तमसाकेवलेनहि॥७॥सासिनांजनसंकाशांदं
ष्ट्राचितवरानना॥विशाललोचनानारीबभूव
तनुमध्यमा॥८॥खड्गपात्रशिरःखेटैरलंकृतच

१६५

तुर्भुजा॥कबंधहारंशिरसाबिभ्राणाहिशिरस्र
जं॥९॥साप्रोवाचमहालक्ष्मींतामसीप्रमदोत्तमा
नामकर्मचमेमातर्देहितुभ्यंनमोनमः॥१०॥
तांप्रोवाचमहालक्ष्मीस्तामसीप्रमदोत्तमा॥द
दामितवनामानियानिकर्माणितानिच॥११॥

महामायामहाकाली महामारीक्षुधातृषा।निद्रा
तृष्णाचैकवीराकालरात्रीर्दुरत्यया॥१२॥इमानि
तवनामानिप्रतिपाद्यानिकर्मभिः।एभिःकर्मा
णितेज्ञात्वायोधीतेसोश्नुतेसुखं॥१३॥तामित्युक्त्वा
महालक्ष्मीःस्वरूपमपरंनृप।सत्वाख्येनातिशु

द्धेनगुणेनेंदुप्रभंदधौ॥१४॥अक्षमालांकुशा
धरावीणापुस्तकधारिणी।साबभूववरानारी
नामान्यस्यैचसाददौ॥१५॥महाविद्यामहावाणी।
भारतीवाक्सरस्वती।आर्याब्राह्मीकामधेनुर्वे
दगर्भाचधीश्वरी॥१६॥अथोवाचमहालक्ष्मीर्महा

स॰श॰
१६१

कालीं सरस्वतीं ॥ युवां जनयतां देव्यौ मिथुने स्वा-
नुरूपतः ॥ १७ ॥ इत्युक्त्वा ते महालक्ष्मीः ससर्ज मिथु-
नं स्वयं ॥ हिरण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलास-
नौ ॥ १८ ॥ ब्रह्मन्विधे विरंचेति धातरित्याह तं नरं ॥
श्रीः पद्मे कमले लक्ष्मीत्याह माता स्त्रियं च तां ॥

१६१

॥ १९ ॥ महाकाली भारती च मिथुने सृजतः सहः ॥
एतयोरपि रूपाणि नामानि च वदामि ते ॥ २० ॥
नीलकंठं रक्तबाहुं श्वेतांगं चंद्रशेखरं ॥ जन-
यामास पुरुषं महाकाली सितां स्त्रियं ॥ २१ ॥ स
रुद्रः शंकरः स्थाणुः कपर्दी च त्रिलोचनः ॥ त्र

स.२.
१६८

यीविद्याकामधेनुः सावित्रीनापाज्ञरास्वरा ॥२२॥
सरस्वतीत्रियंगौरीकृत्स्नंचपुरुषंनृप ॥ जनया
मासनामानितयोरपिवदामिते ॥२३॥ विष्णुः कृ
ष्णोहृषीकेशोवासुदेवोजनार्दनः ॥ उमागौरीस
तीचंडीसुंदरीसुभगाशुभा ॥२४॥ एवंयुवतयः

१६८

सद्यः पुरुषत्वंप्रपेदिरे ॥ चक्षुष्मंतोनुपश्यंति
नेतरेतद्विदोजनाः ॥२५॥ ब्रह्मणोप्रददौपत्नीम
हालक्ष्मीर्नृपनंदनी ॥ रुद्रायगौरीवरदांवासुदे
वायचश्रियं ॥२६॥ स्वरयामहसंनृयविरिंचोउम
जीजनत् ॥ विवेदनगवानुरुद्रस्तजैर्यामहदेवीयं

॥२७॥ अंडमध्ये प्रधानादिकार्यजातमभूत्पु
महाभूतात्मकं सर्वं जगत्स्थावरजंगमं ॥२८॥
पुपोष पालयामास तल्लक्ष्म्या सह केशवः ॥
संजहार जगत्सर्वं सह गौर्या महेश्वरः ॥२९॥
महालक्ष्मीर्महाराज सर्वसत्वमयीश्वरी ॥ निरा

इति पुराणे सावर्णिके मन्वंतरे प्राधानिकं नाम
रहस्यं ॥ ऋषिरुवाच ॥ त्रिगुणा तामसी देवी सात्विकी
या त्रिधोदिता ॥ सा सर्वा चंडिका दुर्गा भद्रा भगव
तीर्यते ॥१॥ योगनिद्रा हरेरुक्ता महाकाली तमोगु
णा ॥ मधुकैटभनाशार्थं यां तुष्टावांबुजासना ॥२॥

कारात्रिसाका॥
रासेवनामाति
धानन्नृत॥२०॥
नामांतरैर्नितृ-



प्येषानाम्नानान्येनकेनचित॥२१॥ ॥इतिमार्के

दशवक्त्रादशभुजादशपादांजनप्रदा॥विशा-
लयाराजमानात्रिंशल्लोचनमालया॥२२॥स्फुर-
द्दशनदंष्ट्रासाभीमरूपापिभूमिप॥रूपसौ-
भाग्यकांतीनांसाप्रतिष्ठामहाश्रियः॥२३॥खड्गबा-
णगदाशूलशंखचक्रभुशुंडिभृत परिघंका-

स०स०
१७१

मुकं शीर्षं निश्चोत क्षुधिरं दधौ ॥५॥ एषा सा वैष्ण
वी माया महाकाली दुरत्यया ॥ आराधिता वशी
कुर्यात्पूजाकर्तुश्चराचरं ॥६॥ सर्वदेवशरीरे
भ्यो याविर्भूतामितप्रभा ॥ त्रिगुणा सा महालक्ष्मी
ः साक्षान्महिषमर्दिनी ॥७॥ श्वेताननानीलभुजा

१७१

सुश्वेतस्तनमंडला ॥ रक्तमध्या रक्तपादा नीलजं
घोरुरुन्मदा ॥८॥ सुचित्रजघना चित्रमाल्यांबर
विभूषणा ॥ चित्रानुलेपना कांतिरूपसौभाग्य
शालिनी ॥९॥ अष्टादशभुजा पूज्या सा सहस्रभुज
सती ॥ आयुधान्यत्र वक्ष्यंते दक्षिणाधः करक्रमा

त्॥२०॥अक्षमालां च कमलं बाणोसिः कुलिशं गदा
चक्रं त्रिशूलं परशुः शंखो घंटा च पाशकः॥२१॥
शक्तिं दंडश्चर्म चापं पानपात्रं कमंडलुं॥ अलं
कृतभुजामेभिरायुधैः कमलासनां॥२२॥सर्वदे
वमयीमीशां महालक्ष्मीमिमां नृप॥ पूजयेत्सर्व

लोकानां स देवानां प्रभुर्भवेत्॥२३॥गौरी देहात्स
मुद्भूतायासत्वैकगुणाश्रया॥साक्षात्सरस्वती
प्रोक्ता शुंभासुरनिबर्हिणी॥२४॥दधौ चाष्टभुजा
बाणान्मुसलं शूलचक्रभृत्॥शंखं घंटां लांगल
ं च कार्मुकं वसुधाधिपः॥२५॥एषा संपूजिता भ

सप्त॰
१९३

क्त्या सर्वं न त्वं प्रयच्छति ॥ निशुंभमथिनी देवी शुं-
भासुरनिवर्हिणी ॥ ६ ॥ इत्युक्त्वा निजरूपाणि मू-
र्त्तीनां तव पार्थिव ॥ उपासनं जगन्मातुः पृथगासां
निशामय ॥ ७ ॥ महालक्ष्मीर्यदा पूज्या महालक्ष्मी
सरस्वती दक्षिणोत्तरयोः पूज्ये पृष्ठतो मिथुनत्रयं

१९३

॥ ८ ॥ विरंचिस्वरया मध्ये रुद्रगौर्यौ च दक्षिणे
वामे लक्ष्म्या हृषीकेशः पुरतो देवतात्रयं ॥ ९ ॥
अष्टादशभुजा मध्ये वामे चास्या दशानना
दक्षिणेष्टभुजा लक्ष्मीर्महतीति समर्चयेत् ॥ १० ॥
पूर्वादिदलतः पूज्याः असितांगादिभैरवः ॥ अष्टा-

स.स.
१७५

दशाननुजाचैषा यदाभूत्सा नराधिप ॥२१॥ दशान
नाचाष्टभुजा दक्षिणोत्तरयोस्तदा ॥ कालहस्तु च
संभूत्यो सर्वारिष्टप्रशांतये ॥२२॥ यदाचाष्टभुजा श
त्यास्तुनासुरनिबर्हिणी ॥ नवास्याः शक्तयः ६
॥ ॥ ॥ ॥ ॥ ॥ ॥ त्यास्तदारुद्रवि

१७

विनायकौ ॥२३॥ नमो देव्या इति स्तोत्रैर्महालक्ष्मी सम
र्चयेत् ॥ अवतारत्रयार्चायां स्तोत्रमंत्रास्तदाश्रयाः
२४ अष्टादशभुजा चैषा यस्यान्महिषमर्दिनी ॥
महालक्ष्मीर्महाकाली सैव प्रोक्ता सरस्वती ॥२५॥
ईश्वरी पुण्यपापानां सर्वलोकमहेश्वरी ॥ मादि

स.स.
१७५

षांतकरी येन स्वजिता साजगत्त्रयं ॥ २६ ॥ पूजयेत्
जगतां धात्रीं चंडिकां भक्तवत्सलां ॥ अर्घ्यादिभि
रलंकारैर्गंधपुष्पैस्तथोत्तमैः ॥ २७ ॥ धूपैर्दीपैश्च नै
वेद्यैर्नानान्नसमन्वितैः ॥ रुधिराक्तेन बलिना मां
सेन सुरया नृप ॥ २८ ॥ बलिमांसादिपूजेयं विप्रवर्

१७५

स.स.
१७६

द्दक्षिणे शरतः सिंहं समग्रं धर्ममीश्वरं ॥ वाहनं
पूजयेद्देव्या धृतं येन चराचरं ॥ ३२ ॥ ततः कृतांजलि
र्भूत्वा स्तुवीत चरितैरिमैः ॥ एकेन वा मध्यमेन
नैकेनेतरयोरिह ॥ ३३ ॥ चरितार्धं तु न जपेज्जपन्
छिद्रमवाप्नुयात् ॥ स्तोत्रमंत्रैः स्तुवीतेमां यदि वा ज

१७६

र्यामयेरिता॥ तेषांकिलस्तुरामांसैर्नैवक्काथ्स्नानं
पक्वचित् ॥२९॥ प्रणामाचमनीयैश्चचंदनेनसुग
धिना॥ सकर्पूरैश्चतांबूलैर्नक्तिःभावसमन्वितैः
३०॥ वामस्तागेग्रतोदेव्याछिन्नशीर्षमहासुरं॥
पूजयेन्महिषंयेनप्राप्तंसायुज्यमीशया॥ ३१

गदांबिकां॥३४॥ प्रदक्षिणानमस्कारान्कृत्वामूर्ध्नि
कृतांजलिं॥ क्षमापयेज्जगद्धात्रीमुक्कैर्मुक्तरनंत्रि
तः॥३५॥ प्रतिश्लोकंचजुहुयात्पायसंतिलसर्पिर
षा॥ जुहुयात्स्तोत्रमंत्रैर्वाचंडिकायैशुभंहविः॥३६
भूयोर्नामपदैर्देवीपूजयेत्सुसमाहितः॥ प्रयतः

प्रांजलिःप्रह्वःप्रणम्यारोप्यचात्मनि ॥३९॥ स्तुचिर
रंतावयेद्देवींचंडिकांतन्मयो ॥ एवंयः पूजयेद्भ
क्त्याप्रत्यहंपरमेश्वरीं ॥३८॥ भुक्त्वाभोगान्यथाका
मंदेवीसायुज्यमाप्नुयात् ॥ योनपूजयतेनित्यंचंडि
कांभक्तवत्सलां ॥ भस्मीकृत्यास्यपुण्यानि नि

र्दहेत्परमेश्वरीं ॥ तस्मात्पूजयभूपालसर्वलोक
महेश्वरीं ॥४०॥ यथोक्तेनविधानेनचंडिकांसु
खमाप्स्यसि ॥४१॥ ॥इतिमार्कंडेयपुराणेसाव
र्णिकेमन्वंतरेदेवीमाहात्म्येवैकृतिकंनामरह
स्यंद्वितीयं ॥२॥ ॥श्री॥ ॥श्री॥ ॥श्री॥



ऋषिरुवाच ॥ नंदाभगवतीनामयाभविष्यतितं
दजा ॥ सास्तुताश्रुजिताभक्त्यावशीकुर्याज्जगत्त्रयं
॥१॥ कनकोत्तमकांतिसाः सुकांतिकनकांबरा ॥ दे
वीकनकवर्णाभाकनकोत्तमभूषणा ॥२॥ कमला
कुशपाशाब्जैरलंकृतचतुर्भुजा ॥ इंदिकाकमला:

लक्ष्मीः साश्रीरुक्मांबुजासना: ३ यारक्तदंतिका
नामदेवीप्रोक्तामयानघ तस्याः स्वरूपंवक्ष्यामिशृ
णुसर्वंत्वयापहं ४ यच्छ्रुत्वासर्वपापेभ्योमुच्यतेन
रसंशयः रक्तांबरारक्तवर्णारक्तसर्वांगभूषणा ५
रक्तायुधारक्तनेत्रारक्तकेशातिभीषणा रक्ततीः

क्ष्णनखारक्तदशनारक्तदंतिका ६ पतिंनारी
वानुरक्तादेवीभक्तंभजेज्जनं वसुधेवविशाला
सासुमेरुयुगलस्तनी ७ दीर्घौलंबावतीस्थूलौत
वतीवमनोहरौ कर्कशावतिकांतौतौसर्वानंद
पयोनिधि ८ भक्तान्संपाययेद्देवीसर्वकामदुघौ

स.म.
१८०

स्तनौ ॥ खड्गं पात्रं च मुसलं लांगलं च बिभर्त्ति सा ॥
९ ॥ आख्याता रक्तचामुंडा देवी योगेश्वरीति च ॥
ऽनया व्याप्तमखिलं जगत्स्थावरजंगमं ॥ १० ॥ इ
मां यः पूजयेद्भक्त्या सव्याप्नोति चराचरं ॥ भुक्त्वा
भोगान्यथाकामं देवीसायुज्यमाप्नुयात् ॥ ११ ॥ अधी

१८७

धीते य इमं नित्यं रक्तदंत्या वपुस्तवं ॥ तं सा परिच
रेद्देवी पतिं प्रियमिवांगना ॥ १२ ॥ शाकंभरी नीलवर
र्णा नीलोत्पलविलोचना ॥ गंभीरनाभिस्त्रिवलीवि
भूषिततनूदरी ॥ १३ ॥ सुकर्कशसमोत्तुंगवृत्तपीन
घनस्तनी ॥ मुष्टौ शिलीमुखापूर्णं कमलं कमला।

स.त.
१८१

लया ॥ १४ ॥ पुष्पपल्लवमूलादिफलाद्यं शाकसं-
चयं काम्यानंतरसैर्युक्तं दधुतीम्भुजरापदं ॥
॥ १५ ॥ कार्मुकं च स्फुरत्कांतिबिभ्रतीं परमेश्वरीं ॥
शाकंभरीं शताक्षीं सा सैव दुर्गा प्रकीर्तिता ॥ १६ ॥
उमा गौरी सती चंडी कालिका सा च पार्वती ॥ शा- १८१

कंभरीं स्तुवन् ध्यायन् जपन् संपूजयन्नमन् ॥
॥ १७ ॥ अक्षयमश्नुते शीघ्रमन्नपानामृतं फलं ॥ भी-
मापि नीलवर्णा सा दंष्ट्रादशनभासुरा ॥ १८ ॥ वि-
शाललोचना नारी वृत्तपीनपयोधरा ॥ चंद्रहासं
च डमरुं शिरःपात्रं च बिभ्रती ॥ १९ ॥ एकवीरा का-

सप्त० १८२

लरात्रीः सैवोक्ता कामदा खलु ता ॥ तेजोमंडलदुर्द्धर्षा भ्रामरी चित्रकांतिभृत् २० चित्रानुलेपना कांतिचित्राभरणभूषिता ॥ चित्रभ्रमरसंकाशा महाभ्रामरीति गीयते ॥ २१ इत्येता मूर्त्तयो देव्या व्याख्याता वसुधाधिप जगन्मातुश्चंडिकायाः की

१८२

र्त्तिताः कामधेनवः ॥ २२ इदं रहस्यं परमं नवा च्यं कस्यचित्त्वया ॥ व्याख्यानं दिव्यमूर्त्तीनां मर धिषावहितः स्वयं ॥ २३ एतस्यास्त्वं प्रसादेन सर्व मान्यो भविष्यसि ॥ सर्वरूपमया देवी सर्वं देव्या मयं जगत् ॥ २४ अतोहं विश्वरूपां तां नमामि प

मत्र॰ रमेश्वरीम्॥२५॥ ॥इतिमार्कंडेयपुराणेमू॰

१८३॥ र्तिरहस्यंनामतृतीयं॥३॥ ॥ शुभंभवतु॥

॥ ॥श्री॥ श्री॥ ॥श्री॥ श्री॥॥

१८३ ॥





॥ समाप्तोयं सप्तशतीपाठः ॥

पोरा प्यो तै र आस्मा सत्या कुर्यं अ- स्वा इ ॥ ७ ॥ क- सर्वेस्वर प [illegible]
सर्व शक्तिसमन्विते भयेभ्य स्त्राहि नो देवि दुर्गे देवि नमोस्तु ते
एवं हृदया विशुद्ध मम सम मामा गणपति [illegible] भीषणां
न्यासः कुरवी [illegible] स हृ [illegible] राखे विता हृ [illegible]
खे [illegible] शंखां चापं [illegible] जीविकां [illegible]
[illegible] दुर्गा [illegible] नमो [illegible] ध्याये [illegible]
नतस [illegible] पुनः [illegible] नमो [illegible]
[illegible] दीनि पानि [illegible] सर्वनः क-

अथ सप्तशती पठ [illegible] यथा [illegible]
पठितां न कार्यं नं जपितो [illegible] ततः शिष्ये श्वरी [illegible]
[illegible] ॐ
क्लीं श्रीं [illegible] चंडिका [illegible] स्वाहा
ॐ श्रीं क्लीं [illegible] सप्तशति चंडिका [illegible] क्लीं [illegible] स्वाहा
[illegible] ॐ अस्य श्री सप्तशती [illegible]
[illegible] स्य मार्कंडेय ऋषि [illegible] गायत्र्यादीनि नाना विधानि छंदांसि
महाकाली महालक्ष्मी महासरस्वती देवताः ऐं ह्रीं क्लीं [illegible]

इति निनयमहात्मि इसंपटोह तत. श्रीस्कंदो
पटेल तत नवाखावर्णि जपेत तात. रहस्यप [illegible]
इति स्ये हानी पट न [illegible]

स्मा लेपरखं चाकुंज शांतिः परमं श्रेनलिंगं अगिनर्लीय [illegible]
सातं म. का. म. के. म. स. प्रोस्त र्थे. रवरि. नी [illegible] लि [illegible]
गदि नीचाकि पीतथा शांखिनी चापिनी वाणा [illegible]
पुष्पा. अंग्र० [illegible] केनपीहिनो दलिपाशि राडोन चों विके [illegible]
स्वगेननः पाणि चापस्यापिरच [illegible] नं. प्राप्यां र [illegible]
पंडि करह्य दृतितेो। आमपणेनामि [illegible] लस्य उतार स्यात [illegible]
म. सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंतिते यानि चात्य

[OrderDescription]
,CREATED=26.08.19 10:16
,TRANSFERRED=2019/08/26 at 11:09:10
,PAGES=191
,TYPE=STD
,NAME=S0001529
,Book Name=M-740-DURGASAHSATI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF

FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF

FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF

FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF

FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF

FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF

FILE190=00000190.TIF
,FILE191=00000191.TIF
,